Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीजिनाय नमः ॥

॥ श्रीलक्ष्मीवल्लभगणीप्रणीत टीका ॥

# श्रीमदुत्तराध्ययनसूत्रम्

मूल, मूलार्थ, टीका, अने टीकाना अनुवाद सहित.

## तृतीय भागः

—: छपावी प्रसिद्ध करनार :—

पालनपुरनिवासी व्हेन मणीबाइए पोताना पिताश्री महेता राजकरण छगनलालना स्मरणार्थे प्रसिद्ध कर्यो.

वीर संवत् २४६२ मूल्यम् रु. ४ सने १९३६

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





॥ श्रीजिनाय नमः ॥

# ॥ अथ श्रीमदुत्तराध्ययनसूत्रम् ॥

( मूलगाथा अने तेनुं भाषांतर-टीका अने टीकानुं भाषांतर )

( मूलकर्त्ता-श्रीसुधर्मास्वामी, टीकाकार-श्रीलक्ष्मीवल्लभगणि )

भाषांतरसहित छपावी प्रसिद्ध करनार-पंडित श्रावक हीरालाल हंसराज—(जामनगरवाळा)

## ॥ अथ दशममध्ययनं प्रारभ्यते ॥

आ द्रुमपत्रनामनुं दशम अध्ययन आरंभ थाय छे.

नवमेऽध्ययने चारित्रविषये निष्कंपत्वमुक्तं, तन्निष्कंपत्वं शिक्षात एव भवति, ततो दशमेऽध्ययने शिक्षां वदति, इति नवमदशमाध्ययनयोः संबंधः. दशममध्ययनं श्रीगौतममुद्दिश्य श्रीवीरेणाभिहितमिति गौतमवक्तव्यता तावदुच्यते—

For Private and Personal Use Only

नवमाध्ययनमां चारित्र्य विषये निष्कंपत्व=अडग पणे रहेवानुं कह्युं, ते निष्कंपत्व शिक्षावडे करीनेज थइ शके छे तेथी दशम अध्ययनमां शिक्षा कहे छे; एवीरीते नवमा तथा दशमा अध्ययननो संबंध=संगति दर्शावी. आ दशम अध्ययन श्रीगौतमने उद्देशीने श्रीमहावीरे कथित छे तेथी गौतम वक्तव्यता प्रथम कहेवामां आवे छे.

---

**पृष्टिचंपा नाम्नी नगरी, तत्र शालनामा राजा, महाशालनामा युवराजः, तयोर्भगिनी यशोमती, तस्याः पिठरनामा भर्तास्ति, यशोमतीकुक्षिसंभूतः पिठरपुत्रो गांगलिनामा वर्तते. अन्यदा भगवान् श्रीमहावीरस्तत्र समवसृतः, शालराजा महाशालादिपरिवृतस्तत्रागतो भगवंतं वंदित्वाग्रे धरणीतलोपविष्टः श्रीमहावीरकृतामिमां देशनामशृणोत् मानुष्यादिका धर्मसाधनसामग्री दुर्लभास्ति, मिथ्यात्वादयो धर्मप्रतिबंधहेतवो बहवो वर्तंते, महारंभादीनि नरककारणानि संति, जन्मादिदुःखप्रचुरः संसारोऽस्ति, कषायाः संसारपरिभ्रमणहेतवः संति, कषायपरित्यागे च मोक्षप्राप्तिरिति भगवद्देशनां श्रुत्वा संवेगमुपागतः शालराजा जिनेंद्रंप्रत्येवमुवाच, भगवच्चरणमूलेऽहं तपस्यामादास्ये, परं महाशालं यावद्राज्ये स्थापयामि तावत् श्रीभगवद्भिरप्यत्र विहारो न कार्यः. भगवतोक्तं प्रतिबंधं माकार्षीरिति शालराजा गृहे गत्वा महासालं भ्रातरं प्रत्येवमाह बंधो ! त्वं राज्यं पालय? अहं व्रतं गृह्णामि, महाशाल उवाच भवद्वदहं संविग्नोऽस्मि, अलं महारंभहेतुना राज्येन, ममापि प्रव्रज्याग्रहणमनोरथोऽस्ति.**

---

आ भारतवर्षमां पृष्टिचंपा नामनी नगरी हती तेना शाल नामे राजा हता तेना भाइ महाशाल नामे युवराज हता, आ बेयनां यशोमती नामे ब्हेन हतां अने तेना पति पिठर नामना हता. आ यशोमतीनी कूखथी पिठरने गांगलि नामे पुत्र थयो हतो.

एक समये भगवान् श्रीमहावीर त्यां (पृष्टिचंपानगरीमां) समवसृत थया=पधार्या. शालराजा पोताना भाइ युवराज महाशाल वगेरेने साथे लइ त्यां आवी भगवान्‌ने वंदन करी आगळ पृथ्वी तळ उपर बेसी श्रीमहावीरे करेली देशना सांभळवा लाग्या— "मनुष्य जन्म आदिक धर्म साधननी सामग्री मळवी घणी दुर्लभ छे, तेनी साथे मिथ्यात्वादिक धर्मना प्रतिबंधक हेतुओ घणा छे, वळी सांसारिक महोटां कार्योना आरंभ करवा ए बधां नरक प्राप्तिना कारणो छे, तेमज जन्म जरा मरणादि दुःखोथी भरेलो आ संसारमां परिभ्रमणना हेतुओ नाना प्रकारना कषायो छे; ए तमाम कषायनो परित्याग थाय त्यारे मोक्ष प्राप्ति थाय.' आ प्रमाणे भगवद्देशनानुं श्रवण करतां शालराजा संवेग पामीने जिनेन्द्र प्रत्ये एम बोल्या के–हे भगवन्! हुं तो हवे आपना चरणमां रही तपस्या ग्रहण करीश तेने माटे मारा अनुज महाशालने राज्यपर स्थापीने हुं पाछो आवुं त्यां सुधी आपे अन्यत्र विहार न करवो, भगवाने कह्युं–'प्रतिबंध नज करशो? त्यारे शालराजा घरे जइ पोताना भाइ महाशालने कहेवा लाग्या के बंधो! आ राज्य तमारुं समजी तमे तेनुं प्रतिपालन करो अने हुं तो व्रत=दीक्षा=ग्रहण करीश, महाशाले उत्तरमां कह्युं के–'हे भाइ! तमारी पेठे हुं पण कंटाळ्यो छुं, आ महान्यवसाय पूर्ण राज्यनुं मारे प्रयोजन नथी. मारे पण प्रव्रज्या ग्रहण करवानो मनोरथ थयो छे.

तदा शालराजेन भगिनीपुत्रो गांगलिः स्वराज्येऽभिषिक्तः, शालमहाशालौ द्वावपि प्रव्रजितौ, भगिनी श्रमणोपासिका जाता, भगवांस्ततो विहारं चकार. शालमहाशालमुनी एकादशांगान्यधीतौ, भगवान् राजगृहे समवसृतः, तत्रानेकभव्यान् प्रतिबोध्य स्वामी चंपायां गतः, तत्र शालमहाशालौ स्वामिनंप्रत्येवमूचतुर्यदि भवदाज्ञा स्यात्तदा वयं पृष्टिचंपायां व्रजामः, यदि कश्चित्तत्र प्रतिबुध्यते सम्यक्त्वं वा लभते तदास्माकं महान् लाभो भवतीति. स्वामिना

तदा तयोर्गौतमः सार्धं दत्तः, गौतमस्वामी ताभ्यां सह पृष्टिचंपायां गतः, तदा गांगलिराजा पितृमातृभ्यां पिठरयशोमतीभ्यां सह वंदितुमायातः, समागतायां पर्षद्येवं देशनां चकार—

ज्यारे युवराजे पण राज्यनुं प्रत्याख्यान कर्युं त्यारे शालराजाए तेनी व्हेनना पुत्र गांगलिनो पोताना राज्यपद उपर अभिषेक कर्यो अने शाल तथा महाशाल बन्नेए प्रव्रज्या गृहण करी, आ बे भाइओनो त्याग जोइ तेनी व्हेन यशोमतीने पण वैराग्य थवाथी ते पण श्रमणा=उपासिका थइ. तदनंतर भगवान् महावीरे ते स्थानकेथी विहार कर्यो. शाल तथा महाशाल मुनि एकादशांगनुं अध्ययन करी तत्त्वज्ञान संपन्न थया. भगवान् त्यांथी राजगृह नगरमां समवसृत थया, त्यां अनेक भव्यजीवोनेप्रतिबोध आपी त्यांथी स्वामी चंपामां आव्या त्यारे शाल तथा महाशाल बन्ने स्वामीने वंदवा आव्या, वंदना करी बोल्या के–'हे भगवन्! जो आपनी आज्ञा होय तो अमे पृष्टिचंपामां जइये त्यां जो कोइ पण भव्यने प्रतिबोध थइ सम्यक्त्व लाभ थाय तो अमने महोटो लाभ थयो गणाय. स्वामीए ते बन्नेनी साथे गौतमने आप्या अने आज्ञा आपी तेथी गौतमने साथे लइ बन्ने पृष्टिचंपा नगरीमां गया ते वारे त्यांना राजा गांगलि पोताना पिता पिठर तथा माता यशोमती साथे लइने वंदन करवा आव्या. ज्यारे पर्षद्=श्रोतृजन वर्ग= आवी बेठो त्यारे ते मुनि आ प्रमाणे देशना करवा लाग्या.

भो भव्याः! विषयप्रसक्ता मा तिष्ठत? अनेकदुःखदारुणे संसारे प्रतिबंधं मा कुरुत? कष्टेन मनुष्यादिसामग्री प्राप्तास्ति, संध्याभ्ररागसदृशो यौवनादिप्रपंचोऽस्ति, क्षणदृष्टो नष्टः सकलसंयोगोऽस्ति, जलबिंदुचंचलं जीवितमस्ति,

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





ततो जिनधर्मे प्रकाममुद्यमं कुरुत? तथाकृतेऽचिरेण शाश्वतपदाप्राप्तिर्भवतां भवतीति गौतमदेशनां श्रुत्वा गांगलिः प्रतिबुद्धो भणति, भगवन्नहं भवदंतिके प्रव्रज्यां गृहीष्ये, नवरं मातापितरौ पृच्छामि, ज्येष्टपुत्रं च राज्ये स्थापयामि.

एवमुक्त्वा गृहे गत्वा मातापितरौ पृष्टौ, ताभ्यामुक्तं यदि त्वं प्रव्रजिष्यसि तदा वयमपि प्रव्रजिष्यामः. ततः पुत्रं राज्ये स्थापयित्वा गांगलिराजा स्वमातृपितृभ्यां सह प्रव्रजितः. गौतमस्वामी तैः शिष्यैः सह पश्चाच्चलितः.

' हे भव्यजनो! तमे विषयोमां आसक्ति न राखो. अनेक दुःखोथी दारुण आ संसारमां प्रतिबंध मा करो, अर्थात् मोक्षमार्गमां अटकायत करे तेवां आचरण मा करो. आ मनुष्य देह जेवी मोक्षनी सामग्री अति कष्टे सांपडी छे. आ यौवनादि अवस्था वगेरे सघळुं संध्या समयना वादळांना रंग जेवुं छे आ संसारना संयोग एक क्षणवारमां जोत जोतामां नष्ट थवाना छे. जलना बिंदु जेवुं चपळ आ जीवित छे. माटे जिनधर्ममां खंतथी प्रवृत्ति करो. तेम करवाथी थोडा समयमांज शाश्वत पदनी प्राप्ति तमोने थशे." आ प्रमाणे गौतमस्वामीनी देशनानुं श्रवण करतां राजा गांगलिने प्रतिबोध थयो तेथी ते बोल्या के–'हे भगवन्! हुं आपनी पासे प्रव्रज्या ग्रहण करीश, माता पिताने पूछवानुं पण मने ठीक नथी लागतुं, मारा ज्येष्ठ पुत्रने राज्य उपर स्थापुं छुं.' आम कही घरे जइ माता पिताने पोतानो विचार पूछतां तेमणे कह्युं के–जा तुं प्रव्रज्या ले तो पछी अमे पण प्रव्रज्या ग्रहण करीशुं. आ पछी पोताना पुत्रने राज्य उपर स्थापी राजा गांगलि पोताना माता तथा पिता सहित प्रव्रजित थया. आ बधा शिष्योने साथे लइ गौतमस्वामी त्यांथी पाछा वळ्या.

मार्गे शालमहाशालयोः शुभाध्यवसायेन केवलज्ञानमुत्पन्नं, पुनरग्रे गच्छतां गांगलिप्रमुखाणां त्रयाणामपि

For Private and Personal Use Only

शुभध्यानेन केवलज्ञानमुत्पन्नं. एवं सर्वेऽपि ते गौतमसहिताश्चंपायां गताः. गौतमस्वामिना भगवच्चरणौ प्रणतौ, शाल-महाशालादिकेवलिनो भगवतः प्रदक्षिणां कृत्वा तीर्थं प्रणम्य केवलपर्षदभिमुखं चलिताः, तावदुत्थितो गौतमस्तान् प्रत्येवं भणति भोः शिष्याः क्व व्रजत? वंदत तीर्थकरं? तावता भगवान् प्राह गौतम! केवलिनो माशातयेति भगवद्वचसा गौतमस्तान् क्षामयति, मनस्येवं च चिंतयति, अहं न सेत्स्यामि, मदीयाः शिष्याः केवलज्ञानमासादयंति, किंत्वद्य यावन्मया केवलज्ञानं न प्राप्तं.

मार्गमां शाल तथा महाशाल बन्ने शुभ अध्यवसायने परिणामे केवलज्ञान उत्पन्न थयुं. फरी आगळ जतां गांगलि पिठर तथा यशोमती ए त्रणेने पण शुभ ध्यानना प्रभावथी केवळज्ञाननो अविर्भाव थयो.

आम सर्वे गौतम सहित पाछा चंपानगरीमां आव्या त्यारे गौतमस्वामीए भगवान पासे जइ चरणमां प्रणाम कर्या. पण पेला शाल तथा महाशाल आदिक केवली वर्ग तो भगवान्ने प्रदक्षिणा करी तीर्थने प्रणाम करी केवल पर्षदने अभिमुख चालवा मांडे छे त्यां गौतमे उठीने पडकार्या के–'हे शिष्यो! तमे क्यां जाओ छो? आ तीर्थंकरनी वंदना करो.' त्यारे भगवान् बोल्या के 'हे गौतम! केवलीनी आशातना मा करो' आवुं भगवाननुं वचन सांभळीने गौतमस्वामी ते केवळज्ञानिओने खमाववा लाग्या, अने मनमां विचार्युं के–'हुं तो हजी सिद्धि पाम्यो नहिं त्यां तो आ मारा शिष्यो केवळज्ञानने प्राप्त थइ गया मने तो हजी सुधी पण केवळज्ञान प्राप्त न थयुं.

इतोऽवसरे मिथो देवानामेवं संलापो वर्तते यदद्य भगवता व्याख्यानावसरे एवमादिष्टं यो भूमिचरः स्वलब्ध्या-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ष्टापदाद्रौ चैत्यानि वंदते स तेनैव भवेन सिद्धिं यातीति श्रुत्वा गौतमः स्वामिनं पृच्छति हे भगवन्नहमष्टापदे चैत्यानि वंदितुं यामीति.

आ अवसरे देवोनो परस्पर संलाप थयो जे-'आजे व्याख्यान टाणे भगवाने एम आदेश कर्यो के-'जे भूमिचर पोतानी लब्धिवडे अष्टापद पर्वतमांना चैत्योनुं वंदन करे ते तेज भवथी सिद्धि पामे; आ सांभळी गौतमे स्वामीने पूछ्युं, के-'हे भगवन्! हुं अष्टापदमां चैत्योनी वंदना करवा जाउं? भगवाने 'भले अष्टापद पर्वते जाओ, अने चैत्यने वंदो आम कह्युं तेथी हर्ष पामी गौतम स्वामी भगवान्ना चरण वांदी पोते अष्टापद पर्वत गया.

भगवतोक्तं व्रजाष्टापदे? तत्र चैत्यानि वंदस्व? ततो हृष्टो गौतमो भगवच्चरणौ वंदित्वा तत्र गतः, पूर्वं हि तत्राष्टापदे तादृग्जनसंवादं दृष्ट्वा पंचपंचशतपरिवारास्त्रयः कोडिन्नदिन्नसेवालाख्यास्तापसा गताः संति, तेषु कोडिन्नस्तापसः सपरिवार एकाँतरोपवासेन भुंक्ते, पारणे मूलकंदान्याहारयति, सोऽष्टापदे प्रथममेखलारूढोऽस्ति. द्वितीयो दिन्नतापसः सपरिवारः प्रत्यहं षष्टषष्टपारणके परिशटितानि पर्णानि भुंक्ते, स द्वितीयमेखलामारूढोस्ति. तृतीयः सेवालतापसः सपरिवारो निरंतरमष्टमपारणके सेवालं भुंक्ते, स तृतीयमेखलामारूढोऽस्ति.

जे संवाद सांभळीने गौतम अष्टापद पर्वत उपर जवा तत्पर थया तेवोज संवाद सांभळी गौतमना पहेला पांचसो पांचसोना परिवार सहित. कोडिन्न, दिन्न तथा सेवाल, एवा नामना त्रण तापस अष्टापद पर्वते पहोंचेला तेमां पहेलो कोडिन्न तापस पोताना



For Private and Personal Use Only

परिवार सहित एकांतर उपवास करी पारणामां कंदमूळनो आहार करता हता ते अष्टापद पर्वतनी प्रथम मेखला उपर आरूढ थया हता; बीजा दिन्न तापस परिवार सहित प्रतिदिन छट्ठे छट्ठे पारणे पाकीने खरी गयेलां पांदडां खाता हता ते अष्टापदनी बीजी मेखला सुधी चड्या हता; त्रीजा सेवाल तापस परिवार सहित हमेशां आठमे पारणे सेवाल खाता हता ते अष्टापद पर्वतनी त्रीजी मेखला पर आरूढ थया हता.

एवं तेषु विलक्ष्यमानेषु गौतमः सूर्यकिरणावलंबेन तत्रारोढुमारब्धः. ते तापसाश्चिंतयंत्येष स्थूलवपुः कथमत्राधिरोढुं शक्ष्यते? वयं तपस्विनोऽप्यशक्ताः. एवं चिंतयत्स्वेव तेषु पश्यत्सु स गौतमः क्षणादष्टापदपर्वतशिखरमधिरूढः, ते पुनरेवं चिंतयंति यदासावतरिष्यति तदास्य शिष्या वयं भविष्यामः. अथ गौतमस्वामी प्रासादमध्ये प्राप्तो निजनिजवर्णपरिमाणोपेताश्चतुर्विंशतिजिनेंद्राणां भरतकारिताः प्रतिमा ववंदे, तासां चैवं स्तुतिं चकार—'जगचिंतामणि जगनाह । जगगुरु जगरक्खण॥' इत्यादि स्तुतिं कृत्वा पूर्वदिग्भागे पृथिवीशिलापट्टकेऽशोकवरपादपस्याध एकरात्रौ पर्युषितः. इतश्च शक्रलोकपालो वैश्रमणस्तत्र चैत्यानि वंदितुमायातः, प्रत्येकं चैत्यानि वंदित्वाशोकतरोरधः समायातः, गौतमस्वामिनं वंदित्वाग्रे निषण्णः, तस्याग्रे गौतम एवं धर्मं कथयति—धर्मार्थकामास्त्रयः पुरुषार्थाः, तत्रार्थकामसाधकत्वेन धर्म एव प्रधानः, स च देवगुरुभक्तिरागेण भवति, देवः पुनः सर्वज्ञः सर्वदर्श्यष्टादशदोषरहितो भवति, गुरवः सुसाधवो भवंति, साधवः समशत्रुमित्राः समलेष्टुकांचनाः पंचसमितास्त्रिगुप्ता अममा अमत्सरा जितेंद्रिया जितकषाया निर्मलब्रह्मचर्यधराः स्वाध्यायध्यानसक्ता दुश्चरतपश्चरणा अंतप्रांताहाराः शुष्कमांसरुधिराः

कृशशरीरा भवंति. इमां गौतमक्रियमाणां देशनां श्रुत्वा वैश्रमणमनस्येवं विसंवादो जातोऽहो एतेषां विशेषपुष्टियुतिधरं शरीरं, यतिवर्णनं चेदृशमिति वैश्रमणमनोवितर्कं ज्ञात्वा गौतमस्तदा पुंडरीकाध्ययनं प्ररूपितवान्- तथा च—



आम ए त्रणे आगळ वधवाना असामर्थ्यने लइ क्लेश पामता हता त्यां गौतमे त्यां जइने सूर्यना किरणोना अवलंबन वडे ए अष्टापदपर आरोहण करवा मांडयुं. त्यारे ते त्रणे तापसो विचार करवा लाग्या के–'अति स्थूल शरीरवाळा आ अष्टापद उपर केम आरोहण करी शकशे? ज्यां चडवाने अमे तपस्वी अशक्त थया' आम ते त्रणे विचार करता जोइ रह्या छे तेटलामां गौतम तो एक क्षणमात्रमां ए अष्टापद पर्वतना शिखर उपर आरूढ थया. आ जोइ ए त्रणे तापसोए विचार्युं के–'ज्यारे ए उतरशे त्यारे आपणे त्रणे एना शिष्यो थशुं? गौतमस्वामी अष्टापदपर्वत उपरना प्रासाद मध्ये पहोंच्या त्यारे त्यां आवेली–पोतपोताना वर्ण परिमाण युक्त चोवीशे तीर्थंकरोनी प्रतिमाओनुं वंदन कर्युं अने ते प्रतिमाओनी–'जगत्ना चिंतामणि, जगत्ना नाथ, जगतना गुरु तथा जगत्ना रक्षण हार! इत्यादि वाक्यो वडे–स्तुति करीने पूर्वदिशा तरफ आवेला एक पार्थिवशिलापट्ट उपर अशोक वृक्षने नीचे एक रात्रि निवास कर्यो. अहीं इन्द्रलोकपाल वैश्रमण त्यां चैत्योनुं वंदन करवा आवेला ते पण दरेक चैत्योना वंदन करी एज अशोक वृक्षतळे आव्या. ते गौतमस्वामीने वंदीने आगळ बेठा त्यारे तेनी आगळ गौतमे कहेवा माडयुं के 'धर्म अर्थ तथा काम आ त्रण पुरुषार्थ छे, तेमां अर्थ तथा कामनो साधक होइ धर्म प्रधान गणाय छे ए धर्म देव तथा गुरुनी भक्तिमां अनुराग थवाथी लाभे छे, देव तो सर्वज्ञ, सर्वदर्शी, अष्टादश दोष रहित छे, अने गुरु तो शुभ लक्षण साधुओ होय छे. साधुओ शत्रु मित्रमां समताधारी, लोष्ट=माटीनुं

ढेफुं तथा कांचनने समान, भावे जोनारा, पंचसमित, त्रिगुप्त, ममकाररहित, मत्सर दोष विमुक्त, जितेंद्रिय, क्रोधादिकषाय जेणे जीत्या छे एवा, निर्दोष ब्रह्मचर्यधारी, स्वाध्याय ध्यानमां निरंतर आसक्त, इतरथी न थइ शके तेवा तपनुं आचरण करनारा, अंतप्रांत आहार सेवनारा तेमज मांस तथा रुधिर शुष्क थतां कृश=दुबळा=शरीरवाळा थाय छे.' गौतमस्वामीए प्ररुपण करातो आदेशना सांभळीने वैश्रवमणना मनमां विसंवाद=संशय=थयो के—'अहो!! आ साधुओनां शरीर तो विशेषपुष्ट तथा कांतिवाळां देखाय छे अने साधुओनां गुण वर्णन तो आवां कष्टयुक्त करे छे; आतो बधुं बीजाने समजाववानुं लागे छे अने पोताने आचरवानुं तो जुदुंज जणाय छे.' आवो तर्क वैश्रमणना मनमां आव्यो ते गौतममुनि जाणी गया ते वखते तेमणे ए वैश्रमणना मनना तर्कनुं निवारण करवा माटे पुंडरीक अध्ययननुं प्ररुपण आरंभ्युं.

---

पुष्कलावतीविजये पुंडरीकिण्यां नगर्यां महापद्मराजाभवत्, तस्य पद्मावती राज्ञी बभूव, तस्याः कुक्षिसंभूतौ पुंडरीककंडरीकनामानौ पुत्रौ जातौ, पितर्युपरते पुंडरीको राजा जातः, कंडरीको युवराजो जातः. अन्यदा तत्र स्थविरा साधवः समायाता, स्थिता नलिनीवनोद्याने, कंडरीककसहितो पुंडरीकस्तत्र गतो वंदित्वाग्रे निषण्णो धर्मदेशनां शुश्राव, पुंडरीकः श्रावक धर्मं प्रपन्नवान्, कंडरीक प्रवुद्धस्तान् प्रत्येवं जगादाहं भवन्निकटे प्रव्रज्यां गृहीष्ये, नवरं पुंडरीकराजानं पृच्छामीत्युक्त्वा पुंडरीकंप्रत्याहं प्रव्रजामीत्युक्तवान्, पुंडरीकोऽप्याह इदानीं त्वं मा प्रव्रज्यां गृहाण? तवाद्य राज्याभिषेकं करोमि, त्वं निश्चितः सन् राज्यं पालय? यथेष्टं सुखं भज? कंडरीको नैतदंगीकुरुते, पुनः प्रव्रज्याग्रहमेव कुरुते

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





यावदसौ राज्यादिलोभेन गृहे स्थापयितुं पुंडरीकेण न शक्यते, तावत्संयमकष्टं पुंडरीकोऽस्य दर्शयति—

पुष्कलावती विजय प्रदेशमां पुंडरीकिणी नामे नगरी हती तेमां महापद्म नामनो राजा राज्य करतो हतो ए राजानी पद्मावती नामे राणी हती. तेनी कूखथी जन्मेला पुंडरीक तथा कंडरीक एवा नामना बे पुत्रो हता, पिता उपराम पाम्या पछी पुंडरीक राजा थयो अने कंडरीकने युवराज कर्यो. एक समये त्यां वृद्ध साधुओ आव्या, नलिनीवन नामना उद्यानमां स्थित थया. कंडरीकने साथे लइ राजा पुंडरीक त्यां गया अने साधुओने वंदन करी आगळ बेठा त्यां धर्मदेशना सांभळीने पुंडरीके श्रावकधर्म स्वीकार्यो, अने कंडरीक तो प्रबुद्ध थयो तेथी तेणे ते साधुओने कह्युं के—'आपनी पांसे हुं प्रव्रज्या ग्रहण करीश, मारे पुंडरीकने पूछवुं नथी, आम पुंडरीकने कह्युं के—हुं प्रव्रजित थाउं छुं.' पुंडरीके कह्युं के—'हमणां तुं प्रव्रज्या लेमां, हुं आजेज तने राज्याभिषेक करुं छुं, तुं निश्चित थइने राज्यपालन कर, यथेष्ट राज्यवैभवोना सुख भोगव? कंडरीके ज्यारे आ मांगणीनो अंगीकार न करतां प्रव्रज्यानो आग्रह करवा मांड्यो अने राज्यादिकना प्रलोभनथी पण पुंडरीके तेने घरे राखी न शक्यो त्यारे तेने संयमना कष्ट देखाडवा मांड्या.

अयं संयमः सत्यः सर्वदुःखक्षयंकरः, परं वालुकास्वादसदृशः, गंगाप्रमुखमहानदीप्रवाहसन्मुखगमनवद् दुःसाध्य, भुजाभ्यां समुद्रतरणवत्कष्टानुष्ठेयः. अत्र द्वाविंशतिपरीषहाः सोढव्याः, ततः सुकुमालशरीरेण भवता नायं संयमः पालयितुं शक्यः, तस्माद् गृह एव तिष्ठ? राज्यसुखं च भजेति पुंडरीकेणोक्तः कंडरीकः प्राह, कापुरुषाणां परलोकपराङ्मुखाणामिहलोकविषयसुखतृष्णावतामयं संयमो दुःपाल्योऽस्ति अहं च विषयसुखपराङ्मुखः परलोकसंमुखः

For Private and Personal Use Only

शूरतरोऽस्मीति नाहं संयमाद्बिभेमीति वदंतं कंडरीकं पुंडरीको राजा संयमायानुज्ञातवान्. पुंडरीककारितमहामहः पूर्वकं कंडरीकः संयमं गृहीतवान्; क्रमेण स्थविरांतिके स एकादशांगानि पपाठ. चतुर्थषष्टाष्टमादितपांसि चकार. एकदा तस्य तपस्विनस्तपःपारणके तुच्छाहारैर्दाघज्वरादयो रोगाः प्रादुर्भूताः, तथाप्यसौ स्थविरैः समं विहारं चकार.



"आ संयम सत्य छे, सर्व दुःखनो क्षयकारक छे किंतु वेळुना कोळीया चाववा जेवो तेमज गंगा आदि महा नदीना प्रवाह सामे धसवा जेवो अति दुःख साध्य छे, वळी हाथ वती समुद्र तरवा जेवो कष्ट अनुष्ठानवाळो छे. जेमां बावीश परीषहो सहन करवाना होय छे ते आ सुकुमार शरीरे तमाराथी ए संयम पाळी शकशे नहिं माटे घरे रहो अने राज्यसुख भोगवो' आम पुंडरीके कह्युं ते सांभळी कंडरीक बोल्यो—परलोकथी विमुख तथा आ लोकना विषय सुखोनी तृष्णावाळा कायर पुरुषोए आ संयम पाळी न शकाय ए वात ठीक छे पण हुं तो विषय सुखोथी पराङ्मुख होइ परलोक संमुख थवामां शूरतर छुं तेथी ए संयमनी कठिनता सांभळी डरतो नथी? आम ज्यारे कंडरीक बोल्या त्यारे पुंडरीक राजाए संयमनी अनुज्ञा आपी अने पुंडरीके करावेला महोत्सव पूर्वक कंडरीके संयम ग्रहण कर्यो. पछी ते स्थविर साधुओ पांसे रही कंडरीके क्रमे करी एकादश अंगनुं अध्ययन कर्युं, चोथा छठ्ठा तथा आठमा आदिक तपनुं आचरण कर्युं. आम करतां ते कंडरीक तपस्वीने तपना पारणामां तुच्छ आहार करवाथी दाहज्वर आदिक रोगो थया तो पण ते रोगजन्य दुःख सहन करता ए स्थविर साधुओनी साथे विहार करता रह्या.

एकदा ते स्थविराः कंडरीकेण समं विहरंतः पुंडरीकिण्यां नगर्यां समायाताः, नलिनीवने समवसृताः, पुंडरीक-

राजा तेषां वंदनाय तत्रायातः, स्थविराणां देशनां श्रुत्वा कंडरीकमृषिं वंदते, तद्वपुः सरोगं पश्यति, पुनः स्थविरांतिके समागत्यैवमवादीद्यदि स्थविराणामाज्ञा स्यात्तदाहं कंडरीकमुनेर्वपुषि प्रासुकौषधादिभिश्चिकित्सां कारयामि, यूयं मम यानशालायां तावत्कालं तिष्ठत? ततस्ते स्थविराः कंडरीकेण समं यानशालायां गत्वा स्थिताः. ततः स पुंडरीकराजा कंडरीकस्य प्रासुकौषधैश्चिकित्सां कारयति, त्वरितमेव तस्य रोगोपशांतिर्जाता, स्थविरास्ततो विहारं चक्रुः, रोगातंकाद्विप्रमुक्तोऽपि कंडरीकमुनिर्मनोज्ञाहारादिभिर्मूर्छितस्ततो विहारं कर्तुं नेच्छति, कंडरीकस्य तादृशं स्वरूपमाकर्ण्य पुंडरीकराजा तदंतिके समागत्यैवमाह धन्यस्त्वं, कृतपुण्यस्त्वं, सुलक्षणस्त्वं, सुलब्धमनुष्यभवस्त्वं, येन राज्यमंतःपुरं च परिहृत्य संयममादृतवान्, एवं द्वित्रिवारं पुंरीकेणोक्ते प्राप्तलज्जः पुंडरीकराजानमापृच्छय कंडरीकः स्थविरैः समं ततो विजहार.

---

एक समये ए स्थविरो कंडरीक सहित विहार करता करता पुंडरीकिणी नगरीमां आवी नलिनीवन स्थानके समवसृत=स्थित थया. ए स्थविरोनुं वंदन करवा राजा पुंडरीक त्यां आव्या. स्थविरोने वंदीने तेओनी देशना श्रवण करी कंडरीकमुनिने वंदन कर्युं त्यारे कंडरीकनुं शरीर रोगग्रस्त दीठुं. फरी स्थविरोनी समीपे आवी पुंडरीक राजा एम बोल्या के–जो आपनी आज्ञा होय तो आ कंडरीकना शरीरनी प्रासुक औषधादिक वडे चिकित्सा करावुं, अने त्यां सुधी आप सर्वे मारी यानशाळामां स्थिति करो. स्थविरोए कंडरीकने उचार करवानी आज्ञा आपी अने पोते सर्वे स्थविरोए राजाना कहेवा प्रमाणे तेनी यानशाळामां स्थिति करी.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



राजाए कंडरीकने प्रासुक औषध सेवन करावतां थोडा दिवसोमां कंडरीक रोगरहित थयो, त्यारे बधा स्थविरो त्यांथी विहार करवा तत्पर थया, पण रोगना दुःखथी मुक्त थयेलो कंडरीक तो मनमान्या आहारमां लोलुप बनेलो तेथी तेणे विहार करवा अनिच्छा बतावी एटले कंडरीकनो तेवो आशय सांभळी राजा पुंडरीके तेनी पासे आवीने कह्युं के–'तुं धन्य छो, तें घणां पुण्य करेलां छे, तुं शुभ लक्षणवान् छो, तें मनुष्यभवनुं सार्थक्य कर्युं के जे राज्य तथा अंतःरपुनो त्याग करीने संयममां आदरवाळो थयो, आम पुंडरीके बे त्रण वार कह्युं त्यारे शरमाइने पुंडरीक राजानी रजा लइ कंडरीके स्थविरोनी साथे विहार कर्यो.

---

कियत्कालमुग्रविहारं कृत्वा पश्चात्संयमाद्धिखिन्नः शनैः शनैः स्थविरांतिकान्निर्गत्य पुंडरीकिण्यां नगर्यामशोकवाटिकायामशोकवरपादपस्याधः समागत्य शिलापट्टमारूढ उपहतमनःसंकल्पः किंचिद् ध्यायन्नेव तिष्ठति. ततः पुंडरीकोऽपि तत्रागत्य तं त्रिःप्रदक्षिणीकृत्य धन्यस्त्वमित्याद्युक्तवान्, कंडरीकस्य तद्वचनं न रोचते, सर्वथा संयमाद्भ्रष्टं तं ज्ञात्वा पुंडरीकः पुनरेवमुवाचाहो भ्रातस्ते यदि विषयार्थस्तदेदं राज्यं गृहाणेत्युक्त्वा तं राज्येऽभिषिक्तवान्, स्वयं तु पंचमौष्टिकं लोचं कृत्वा संयममुपात्तवान्, कंडरीकसत्कं पात्रोपकरणादिकं च गृहीतवान्. स्थविराणामंतिके प्रव्रज्यां गृहीत्वाहारं गृहीष्ये, नान्यथेत्यभिग्रहं कृत्वा स्थविराभिमुखमेकाक्येव चलितः,

---

आम केटलोककाळ अणगमता मने स्थविरोनी साथे विहार करी पाछळथी संयम पालन करवामां कंटाळो खाइ धीरेधीरे स्थविर समीपेथी नीकळी पाछा पुंडरीकिणी नगरी प्रति आव्या अने अशोक वाटिकामां अशोकना सुंदर वृक्षनी नीचे एक शिलापट्ट

For Private and Personal Use Only

हतो तेना उपर चडी मनः संकल्प उपहत थवाथी जाणे कंइक ध्यान करता होय तेम उद्विग्न थइने बेठा, आ वखते राजा पुंडरीक त्यां आवी तेने त्रण प्रदक्षिणा करी प्रथमनी पेठे 'तमे धन्य छो' इत्यादि कहेवा मांडयुं. कंडरीकने आ वचनो रुच्यां नहिं. त्यारे 'आतो सर्वथा संयमथी भ्रष्ट थयो छे' एम जाणीने फरी पुंडरीके तेने कह्युं के–'अहो भाइ! तमो जो विषयभोग भोगववा इच्छता हो तो आ राज्य ग्रहण करो.' आम कहीने राजा पुंडरीके कंडरीकने गाममां लइ जइ पोताना राज्य उपर अभिषिक्त कर्या अने पोते स्वयमेव पंच मुष्टि लोच करी संयम ग्रहण कर्युं, कंडरीकना पात्र उपकरण वगेरे पोते लीधां अने 'स्थविरोनी समीपे प्रव्रज्या ग्रहण कर्या पछी आहार करीश ते विना नहिं' आवो अभिग्रह स्वीकारीने स्थविरोना तरफ एकलाज चाली नीकल्या.

---

कंडरीकस्तु राजगृहांतर्गत्वा तस्मिन्नेव दिने सरसमाहारं भुक्तवान्, रात्रौ च तस्य तदाहारस्य रसात्कृशशरीरस्योदरे महाव्यथोत्पन्ना, न कोऽपि तस्याग्रे मंत्रिसामंतादिकश्चिकित्सार्थं समायाति, प्रव्रज्यापरित्यागादयोग्य इत्ययं सर्वैरपि लोकैरुपेक्षितः, स आर्त्तरौद्रध्यानोपपन्नः कालं कृत्वा सप्तमनरकपृथिव्यां नारकत्वेनोत्पन्न. पुंडरीकस्तु स्थविरांतिके गत्वा पुनर्दीक्षां गृहीतवान, प्रथममष्टमं तपः कृतवान, पारणे च शीतलरूक्षाहारेण वपुषि महावेदना समुत्पन्ना, ततस्तेनानशनं विहितं, चत्वारि शरणानि कृतानि, आलोचितप्रतिक्रांतः पुंडरीकः कालं कृत्वा सर्वार्थसिद्धविमाने देवत्वेनोत्पन्नः, इममाख्यानं वैश्रमणाग्रे उक्त्वैवं पुनरुवाचाहो देवानुप्रिय! दुर्बलशरीरोऽपि कंडरीकः सप्तमीं भूमिं गतवान्, सबलशरीरोऽपि पुंडरीकः सर्वार्थसिद्धिविमाने गतस्तस्माद् दुर्बलशरीरं संयमसाधनं तद्व्याघातकं

वा, एवं नियमो नास्ति, किंतु ध्यानमेव तत्साधनं, यस्य शुभध्यानं स संयमाराधकः, यस्य तु ध्यानशुभं स संयमविराधकः. एवं गौतमस्वामिव्याख्यानं श्रुत्वा वैश्रमणो वंदित्वा स्वस्थानं गतः.

---

अहीं कंडरीके तो राजगृहनी अंदर जइ तेज दिवसे सरस आहार खुब तृप्ति पूर्वक खाधो. आ आहार कृश शरीर कंडरीकना उदरमां जरी न शक्यो तेथी तेना पेटमां महा व्यथा=पीड=थवा लागी. तेनी पांसे मंत्री सामंत वगेरेमाना कोइ पण आवे नहिं, केमके प्रव्रज्यानो तेणे परित्याग कर्यो तेथी अयोग्य गणी बधाय तेनी उपेक्षा करता हता, आथी ए कंडरीक आर्त्त तथा रौद्र ध्यान वाळो बनतां मरण पामी सातमी नरक भूमिमां नारकी उत्पन्न थयो. पुंडरीके तो स्थविरोनी समीपे आवी दीक्षा ग्रहण करीने अष्टम तपने अंते पारणामां टाढा तथा लूक्ष अन्नने आहार कर्यो तेथी तेना शरीमां महा वेदना उत्पन्न थतां तेणे अनशन व्रत लइ चार शरणो गृह्यां. आवी रीते पुंडरीक प्रतिक्रांतनी आलोचना करतो मरण पामी सर्वार्थ सिद्धि नामना विमानमां देव भावे उत्पन्न थयो; त्यांथी च्युत थशे त्यारे महाविदेह क्षेत्रे जन्म लइ सिद्धिपद पामशे. आ आख्यान वैश्रमण आगळ कहीने गौतममुनि फरीने बोल्या के—'हे देवानु प्रिय! दुर्बळ शरीर वाळो पण कंडरीक सप्तमी नरक भूमिए गयो अने सबळ शरीरवाळो पुंडरीक सर्वार्थ सिद्धि विमाने गयो; ते उपरथी–दुर्बळ शरीर संयम साधन छे अथवा पुष्ट शरीर संयमनुं व्याघातक छे आवो कंइ नियम नथी किंतु शुभ ध्यानज संयम साधन छे, जेने शुभ ध्यान छे ते संयमनो आराधक अने जेनुं ध्यान अशुभ ते संयमनो विराधक समजवो. आवुं गौतमस्वामीनुं व्याख्यान श्रवण करी वैश्रमण वंदन करी पोताने स्थाने गया.

गौतमः प्रभाते चैत्यानि नमस्कृत्याष्टापदात्प्रत्यवतरतिस्म, तापसास्तदैवमाहुर्यूयमस्मद्गुरवो वयं भवच्छिष्या भवामः, तदा गौतमस्वामी भणति मम धर्माचार्यस्त्रिलोकगुरुर्वर्धमाननामास्ति, ते च भणंति युष्माकमप्याचार्यो वर्तते किं? गौतमः प्राहेदृशो मम धर्माचार्यो वर्तते, यथा सर्वज्ञः सर्वदर्शी रूपसंपदा तिरस्कृतत्रिलोकरूपः किंकरीकृतसकलसुरासुरविरचितसमवसरणोपविष्ट उपरिधृतच्छत्रत्रयः सुरेंद्रवीज्यमानचामरयुगलः चतुस्त्रिंशदतिशयनिधानः श्रमणभगवान् श्रीमहावीरनामा वर्तते.

---

प्रभातमां गौतम चैत्योने नमस्कार करी अष्टापद पर्वत उपर उतर्या त्यारे पेला तापसोए कह्युं के-तमे अमारा गुरु थाओ अमे तमारा शिष्यो थवा इच्छीये छइए. गौतमस्वामी बोल्या के-'मारा धर्माचार्य त्रिलोकगुरु वर्द्धमान नामना छे,' त्यारे तापसो बोल्या के-'वळी आपनाय कोइ आचार्य छे!' गौतमे कह्युं-'मारा आचार्य तो एवा छे के-ते सर्वज्ञ छे, सर्वदर्शी छे, रुप संपत्तिथी त्रणे लोकना रुपनो तिरस्कार करे एवा तथा सकल सुर असुर जेना किंकर थइ समवसरण रचना करे तेना उपर बेठेला छे, जेना उपर त्रण छत्र धरायेलां छे, सुरेंद्र जेने चामर ढोळे छे, चोंत्रीश अतिशयोना निधान श्रमण भगवान् महावीरनामना मारा परमाचार्य छे'

---

एवं वीतरागस्वरूपमाकर्ण्य तेषां तापसानां सम्यक्त्वोपचयः संपन्नः. ततः सर्वेऽपि तापसा गौतमस्वामिना प्रव्राजिताः, शासनदेव्या तेषां सर्वेषां लिंगान्युपनीतानि, तैः सर्वैः शिष्यैः सह गौतमस्वामा ततश्चलितः कस्मिंश्चिद् ग्रामे गतः, भिक्षावेला जाता, गौतमेनोक्तं यद्भवतां रोचते तद्वक्तव्यं, मया तदानीयते, तैरुक्तं पायसमानेयं, सर्वल-

ब्धिसंपन्नो गौतमः क्वचिद् गृहे पतद्ग्रहं पायसेन भृतवान्, उपाश्रये आगत्य सर्वेषां तेषां मंडल्यामुपवेशितानां पात्रेषु क्षीरं परिवेषितवान्, न च क्षीरं क्षीणं भवति, महानसिकलब्धिमता गौतमेन पतद्ग्रहेंगुष्टक्षेपाज्जेमतामेव सेवालतापसानामीदृशः परिणामो जातोऽहोस्माकं शुभकर्मोदयो जातः, यतोऽनभ्रवृष्टिसदृशः समस्तशास्त्रार्णवपारगामीदृशो गुरुस्माभिर्लब्धः, इत्यादि भावनां भावयतां तेषां तदैव केवलज्ञानमुत्पन्नं.

---

आवुं वीतरागनुं स्वरुपाख्यान सांभळतांज ते तापसोने सम्यकत्वनो उपचय थयो तेथी ए सर्वे तापसोए गौतमस्वामी पासे प्रव्रज्या ग्रहण करी. शासनदेवताओए ते सर्व तापसोने सर्व (रजोहरणादि) लिंग=चिन्हो=आप्यां एटले गौतमस्वामी ते सर्व शिष्योने साथे लइ त्यांथी चालीने कोइ गाममां गया त्यां भिक्षावेळा थइ त्यारे गौतमे शिष्योने कह्युं के-'तमने जे भोजन रुचे=भावे=ते बोलो एटले हुं ते लइ आवुं.' ते तापसो बोल्या के-'पायस भोजन लावो' गौतम सर्व लब्धि संपन्न होवाथी पांसेना गामेथी कोइ गृहस्थने त्यांथी पात्र पायसथी भरी लाव्या. उपाश्रये आवी ते सर्व साधुओने मंडळीमां बेसाडीने सर्वना पात्रमां खीर पीरसी, बधा साधुओ तृप्त थया तथापि खीर खूटी नहिं केमके गौतमे माहानसिक=रसोडां संबंधी=लब्धि=सिद्धि मेळवेली तेथी तेओ पातरामां पोतानो अंगुठो नाखे तेथी पायस क्षीण=ओछुं=थाय नहिं. आ अवसरे जे पांचसोने एक अष्टपदनी त्रीजी मेखलाए पहोंचेला सेवालवर्गी साधुओ हता तेओने जमतां जमतां एवोज कोइ परिणाम थयो के-'अहो! आपणः शुभ कर्मनो उदय थयो के जेथी वादळां विना जेम वृष्टि थाय तेम आज आपणने समस्त शास्त्ररूपी सागरना पारने पामेला आवा गुरु मल्या;' आवी आवी भावनाओनुं

अनुध्यान करतां तेओने तेज क्षणे केवळज्ञान उत्पन्न थयुं.

दिन्नतापसानां तु भोजनानंतरं चलितानां भगवत्समीपे प्राप्तानां भगवतश्छत्रादिविभूतिं च पश्यतां तथाविधशुभाध्यवसाययोगेन केवलज्ञानमुत्पन्नं. कोडिन्नतापसानां तु स्वामिनं साक्षाद् दृष्ट्वा तादृशाध्यवसायेनैव केवलज्ञानमुत्पन्नं. गौतमस्वामी भगवच्चरणौ प्रणनाम, ते तापसमुनयः केवलिनस्त्रिःप्रदक्षिणीकृत्य केवलिपर्षदभिमुखं चलिताः. तदा गौतमस्वामी भणतीहागच्छत? भगवंतं प्रणमत? भगवान् महावीरः प्राह गौतम! केवलिनो माशातय? ततो गौतमस्तेषां मिथ्यादुष्कृतं ददौ. ततःपरं गौतमस्य महत्यधृतिर्जाता. ततो भगवान् महावीरः गौतमस्वामिनंप्रत्याह गौतम! पूर्वभवपरिचितत्वेन तव मयि महान् रागोऽस्ति, तत्क्षयमंतरेण तव केवलज्ञानं नोत्पद्यते, क्षीणे च तस्मिन्नेव भवे तवावश्यं केवलमुत्पत्स्यते, प्रशस्तोऽपि रागः केवलप्रतिबंधको भवत्येव, त्वमहं च द्वावपि निर्वाणे तुल्यौ भविष्याव इति माऽधृतिं कार्षीरिति. तदानीं स्वामी महावीरो द्रुमपत्त्रमध्ययनं प्ररूपितवान्.

बीजी मेखालामां अवस्थित हता ते दिन्न आदिक पांचसोने एक साधुओ भोजन कर्या पछी चाली भगवत्समीपे पहोंच्या त्यां तेओने भगवाननी छत्रचामरादि विभूति=वैभव=जोइने तादृश शुभ अध्यवसायनां योगे केवळज्ञान उत्पन्न थयुं. प्रथम मेखलावाळा कोडिन्न आदिक पांचसो एक साधुओने ज्यारे महावीरस्वामीनुं साक्षात् दर्शन थयुं त्यारे तादृश शुभ अध्यवसायना प्रभावथी केवळज्ञान उत्पन्न थयुं. गौतमस्वामी भगवानना चरणमां प्रणाम करता हता त्यां आ पंदरसोने त्रण केवळी तापसमुनिओ भगवानने त्रण

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





प्रदक्षिणा करी केवळी पर्षद्ने अभिमुख चालता थया. त्यारे गौतमस्वामीए कह्यु के–अहीं आवो अने भगवान्ने प्रणाम करो.' आ समये भगवान् महावीरस्वामीए कह्यु के–'हे गौतम केवळीनी अशातना मा करो' आ वचन सांभळी गौतमे ते मुनिओने 'मिथ्या दुष्कृतं' कहीने खमाव्या; पण गौतमना मनमां महोटी अधृति (धैर्य रहितता) थइ पडी त्यारे भगवान् महावीरे गौतमस्वामी प्रत्ये कह्युं के–'हे गौतम! तमारो मारे विषे पूर्वभवना परिचयने लीधे महान् राग छे ते रागनो क्षय थया विना तमने केवळज्ञान उत्पन्न नथी थतुं, ज्यारे ए राग क्षय पामशे त्यारे एज भवे तमने केवळज्ञान अवश्य उत्पन्न थशे. राग गमे तेवो प्रशस्त=सारो होय तो पण केवळज्ञाननो प्रतिबंधक थायज. एटले तुं तथा हुं आपणे बन्ने निर्वाणपदे तुल्य थइशुं माटे तमे अधृति मा करशो. एम कही ते समये महावीरस्वामीए आ 'द्रुमपत्त' अध्ययननी प्ररूपणा करी.

---

इदं चाध्ययनं सूत्रतोऽर्थतश्च भगवता श्रीमहावीरेणैव प्ररूपितमिति श्रीमदुत्तराध्ययनबृहद्वृत्तौ. ततो ये वदन्त्युत्तराध्ययनसूत्रे वीरवाणीस्पर्शोऽपि नास्ति ते कुमतय एव बोद्धव्याः.

---

आ अध्ययन सूत्ररूपे तथा अर्थथी पण भगवान् श्रीमहावीरस्वामीएज प्ररूपित छे एम उत्तराध्ययननी बृहद् वृत्तिमां निर्देश करेलो छे तेथी जेओ एम बोले छे के 'उत्तराध्ययनमां वीरवाणीनो स्पर्श पण नथी' तेओने कुमति समजवा.

---

दुमपत्तए पंडुरए। जहा निवडइ राइगणाणमच्चए॥ एवं मणुआणजीवियं। समयं गोयम मा पमायए॥१॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





[जहा] जेम (राइगणाणं अच्चए) रात्रि वीती गया पछी [पंडुअए) पाकी गयेल (दुमपत्ताए) वृक्षनुं पांदडुं (निवडइ) पडी जाय छे (एवं) एज प्रमाणे (मणुआण) मनुष्योनुं (जीविअं) जीवित=आयुष्य क्षीण थाय छे तेम (गोअम) हे गौतम! (समयं) एक समय मात्र पण (मा पमायए) प्रमाद करवो नहिं. १

---

व्या०–भगवान् श्रीमहावीरदेवो गौतमस्वामिनमुद्दिश्यान्यानपि भव्यजीवानुपदिशति–हे गौतमैवमनेन दृष्टांतेन मनुजानां मनुष्याणां जीवितं जानीहि? त्वं समयं समयमात्रमपि मा प्रमादीः? प्रमादं मा कुर्याः? अत्र समयमात्रग्रहणमत्यंतप्रमादनिवारणार्थं, अनेन केन दृष्टांतेन? तद् दृष्टांतमाह—यथा रात्रिगणानामत्यये गमने, रात्रीणां गणा रात्रिगणाः कालपरिणामा रात्रिदिवससमूहास्तेषामत्ययेऽतिक्रमे पांडुरकं द्रुमपत्रकं पक्कं वृंताच्छिथिलप्रायं पर्ण निपतति, तथैव दिनानामत्यये आयुर्लक्षणे वृंते शिथिले जाते सति जीवितं शरीरं पतति, जीवो जातो यस्मिंस्तज्जीवितं शरीरमित्यर्थः, जीवितस्य कालस्य विनाशाभावात, जीवितशब्देन शरीरमुच्यते. यदाह निर्युक्तिकारः—परियत्तिय लावन्नं । चलंति संधि मुअंति विंटग्गं ॥ वसणं पत्त पत्तं । काले पत्ते भणइ गाहं ॥ १ ॥ जह तुज्झे तह अम्हे । तुज्झेवि अहो हिआ जहा अम्हे ॥ अप्पाहेइ पडंतं । पंडुअपत्तं किसलयाणं ॥ २ ॥ न विअत्थि नवि अ होही । उल्लावो किसलपंडुपत्ताणं ॥ उवमा खलु एस कया । भवियजणा विबोहणट्ठाए ॥ ३ ॥ यथा हि किसलयानि पांडुपत्रेणानुशिष्यंते तथान्योऽपि यौवनगर्वितोऽनुशासनीयः. ॥ १ ॥ अथायुषोऽनित्यत्वमाह—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





भगवान् श्रीमहावीरदेव गौतमस्वामीने उद्देशीने अन्य पण भव्य जीवोने उपदेश करे छे. हे गौतम! आ दृष्टांत उपरथी मनुष्योनुं जीवित जाणो, अने तमे समयमात्र पण प्रमाद मा करो. अहीं समय मात्रनुं गृहण अत्यंत प्रमाद निवारणार्थ करेलुं छे. क्या दृष्टांतथी? आना उत्तररूपे दृष्टांत कहे छे यथा=जेम=रात्रीना त्रण=काळपरिणाम विशेष=अर्थात् रात्री तथा दिवसना समूहोनो अत्यंत=अतिक्रम थतां पांडुरक एटले फीका रंगनुं थइ गयेलुं डुमपत्र=झाडनुं पांदडुं=पाकीने डीटमांथी छुटुं पडवानी अणी पर आवेलुं खरी पडे छे तेवीज रीते दिवसो वीततां आयुष्यरूपी डींट शिथिल थतां जीवितं=(जेमा जीव जन्म्यो कहेवायो ते)शरीर पडी जाय छे. अहीं जीवित काळनो तो विनाश थतो नथी तेथी जीवित शब्दे करी शरीरज समजवानुं छे. निर्युक्तिकार लखे छे के-'ज्यारे लावण्य=कोमळता युक्त चमक=हती ते पर्यय=नाश पामी, तथा सांधा चलित थइ गया अने वृंताग्र=डींटडुं पण मुकाइ गयुं ते काळे व्यसन=अवस्थांतर=ने पामेलुं पांडुर पत्र=पींगळुं थइने खरतुं पान,=किसलय=नवां कुंपळीयांने कहे छे.? जेम हमणां तमे छो, अमे पण एक काळे तेम हतां अने हमणां जेम अमे छइए तेवा तमे पण एक काळे थशो. २ आ कुंपळीयां तथा खर्यां पांदडांनो उल्लाप=संवाद थयो नथी तेम थवानो पण नथी किं तु आ एक उपमा भविक जनोने विबोधनार्थे कही छे. ३ अर्थात् जेम पांडुपत्रोए किसलयने शिखामण आपी तेम अन्य यौवन गर्वित जनने पण शिखामण देवानी छे. १ हवे आयुष्यनी अनित्यता कहे छे.

---

कुसग्गे जह ओसबिंदुए । थोवं चिट्ठइ लंबमाणए ॥ एवं मणुयाण जीवियं । समयं गोयम मा पमायए ॥२॥

(जह) जेम (कुसग्गे) दर्भना अग्रभागपर (लंबमाणए) लटकतुं (ओसबिंदुए) झाकळनुं बिंदु [थोवं] अल्प काळ [चिट्ठइ]

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





रहे छे, (एव) तेज प्रमाणे [मणुआण] मनुष्योनुं [जीविअं] जीवीत छे, तेथी करीने [गोयम] हे गौतम! [समयं] एक समय मात्र [मा पमायए] प्रमाद न करवो, २

व्या०—हे गौतम! समयमात्रमपि मा प्रमादीः? तत्र हेतुमाह—कुशस्याग्रेऽवऽश्यायबिंदुर्लंबमानः सन् स्तोकं स्तोककालं तिष्ठति, वातादिना प्रेर्यमाणः सन् पतति, तथा मनुष्याणां जीवितमायुरस्थिरं ज्ञेयं. एवमायुषोऽनित्यत्वं ज्ञात्वा धर्मे प्रमादो न विधेय इत्यर्थ.

हे गौतम! समयमात्र प्रमाद न करशो. तेमां हेतु कहे छे, जेम दर्भना अग्र भाग उपर लटकतो झाकळनो बिंदु अत्यंत स्वल्प-काळ स्थित थइ वायु आदिकथी प्रेराइ झट पडी जाय छे तेम मनुष्योनुं जीवित=आयुष्य पण एना जेवुंज अस्थिर जाणवुं. आम आयुष्यनी अस्थिरता=अनित्यता याद राखी धर्माचरणमां सर्वथा प्रमाद करवो नहिं. २

इत्तरियंमि आऊए । जीविए अ बहुपच्चवायाए ॥ विहुणाहि रयं पुरेकडं । समयं गोयम मा पमायए ॥ ३ ॥

[इइ] आ प्रमाणे [आए] आयुष्य [इत्तरिअम्मि] अल्पकाळनुं छते [जीविआए] जीवित [बहुपच्चवायए] घणा विघ्नवाळु [पुरेकडं] पूर्वे करेलां [रयं] कर्मरूपी रजने (विहुणाहि) तुं दूर कर? (गोयम) हे गौतम! (समयं) एक समय पण (मा पमायए) प्रमाद न करवो. ३

व्या०—इत्युक्तदृष्टांतेनेत्वरे स्वल्पकालपरिमाणे मनुष्यस्यायुषि भो गौतम! पुराकृतं रजः प्राचीनकृतं पातकं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





दुःकर्म विशेषेण धुनीहि? जीवात्पृथक्कुरु? हे गौतम! पुनर्जीवितकेऽर्थात्सोपक्रमे आयुषि बहवः प्रत्यवाया उपघातहेतवोऽध्यवसायादयो वर्तंते यस्मिंस्तद्बहुप्रत्यवायकं, तस्मिन् बहुप्रत्यवायके समयमपि मा प्रमादं कुर्याः? अत्रायुःशब्देन निरुपक्रममायुर्भण्यते, जीवितशब्देन सोपक्रमं भण्यते. एति प्राप्नोत्युपक्रमहेतुभिरतः प्रवर्त्यतया यथास्थित्यैवानुभवमित्यायुः, तस्मिन्नायुषि निरुपक्रमे आयुषि स्वल्पपरिमाणेऽपि दुःकृतं दूरीकुरु? यद्यपि पूर्वकोटिप्रमाणमायुर्भवति, तथापि देवापेक्षया स्वल्पमेव ज्ञेयमतृप्तत्वात्. यदुक्तं—धनेषु जीवितव्येषु । रतिकामेषु भारत ॥ अतृप्ताः प्राणिनः सर्वे । याता यास्यंति यांति च ॥१॥ अत्र सोपक्रमनिरुपक्रमायुर्ज्ञानं केवलिन एव भवेत्. ॥३॥

---

एम उक्त दृष्टांतथी इत्वर–सततगमन करतुं–स्वल्पकाल परिमाणनुं मनुष्य आयुष्य छे माटे हे गौतम! पूर्वे करेलां दुष्कर्म रजने विशेषे करी खंखेरी नाखो–जीवथी छुटां करी नाखो. हे गौतम! जीवित–सोपक्रम आयुष्यमां घणा प्रत्यवाय=उपघातना हेतुओ अध्यवसायादिक रहेला होय छे माटे समय=क्षण पण प्रमाद मा करशो. आ गाथामां आयुः शब्दथी निरुपक्रम आयुष्य कहेवाय छे तथा जीवित शब्द वडे सोपक्रम आयुष्य कहेवामां आव्युं छे. 'एति'=उपक्रम हेतु वडे अनुभवाय छे ते आयुः, ते स्वल्पपरिमाणना निरुपक्रम आयुष्यमां पण दुष्कृतने दूर करो. आयुष्य तो जोके पूर्व कोटि प्रमाण छे तो पण देवोनी अपेक्षाये स्वल्प मनाय कारण के आयुष्य विषयमां सर्व अतृप्तज होय छे. कह्युं छे के–'धन, जीवित अने काम सुख; आ त्रणेना विषयमां प्राणिओ हमेशां तृप्ति पाम्या विनाज गत थया छे, गत थशे अने गत थाय छे.' आ सोपक्रम तथा निरुपक्रम आयुष्यनुं ज्ञान केवळीनेज होय छे.३

For Private and Personal Use Only

दुल्लहे खलु माणुसे भवे । चिरकालेणवि सव्वपाणिणं ॥ विगाढा य विवागकम्मुणो । समयं गोयम मा पमायए॥४

(सव्वपाणिणं) सर्व प्राणीने (चिरकालेण वि) चिरकाले करीने पण (माणुसे भवे) मनुष्यभव (दुलहे खलु) दुर्लभजछे (य) कारणके (कम्मुणो) कर्मोना (विवाग) विपाको (गाढा) गाढछे तेथी [गोयम] हेगौतम! (समयं) समयमात्र (पमामायए) प्रमाद करवो नहिं.४

खल्विति निश्चयेन सर्वप्राणिनां सर्वजीवानां चिरकालेनापि मनुष्यो भवो दुर्लभो दुःप्राप्यो वर्तते, तत्र हेतुमाह—कर्मणां मनुष्यगतिविघातकानां विपाका विगाढा विशेषण गाढा विगाढा विनाशयितुमशक्यास्तस्मात्समयमात्रमपि प्रमादं मा कुर्याः. ॥४॥ कथं मनुजत्वं दुर्लभमित्याह--

खलु=निश्चये जाणजो जे सर्वप्राणी=जीवो=ने लांबे काळे पण मनुष्यभव दुर्लभ=दुष्प्राप्य छे, कारण के-मनुष्यगतिनां विघातक जे कर्मो छे तेना विपाक विशेषतया गाढ=दृढ होय छे, अर्थात् तेओनो विनाश सहेलाइथी थइ शकतो नथी माटे हे गौतम समय=क्षण पण प्रमाद मा करशो. ४ हवे मनुष्यत्व केम दुर्लभ छे? ते करी देखाडे छे.

पुढविक्कायमइगओ । उक्कोसं जीवो उसंवसे ॥ कालं संखाईयं । समयं गोयम मा पमायए ॥ ५ ॥

(पुढविकायं अइगओ) पृथ्वीकायने पामेलो (जीवोउ) जीव [उक्कोसं] उत्कर्षथी (संखाईयं कालं) संख्यातीत काळ सुधी (संवसे) रहे छे (गोयम) हे गौतम! (समयं) एक समय पण (मा पमायए) प्रमाद करीश नहिं ५

जीवः संसारी पृथ्वीकायमधिगतः पृथ्वीकायभावं प्राप्तः सन्नुत्कर्षत उत्कृष्टकालं संख्यातीतमसंख्योत्सर्पिण्यवसर्पिणीमानं कालं संवसेत्तद्रूपतयावतिष्ठेत्, तस्मात्समयमात्रमपि मा प्रमादीः? ॥५॥

संसारी जीव पृथ्वीकाय भावने पाम्या पछी उत्कर्षतः संख्यातीत=असंख्यात उत्सर्पिणी अवसर्पिणी प्रमाणना काळ पर्यंत तद्रूपेंज संवास करे छे अर्थात् पार्थिवकायमांज उत्कर्ष पाम्या करे छे; माटे हे गौतम! समय=निमेष मात्र काळ पण प्रमाद करवानो नथी.५

आउक्कायमइगओ । उक्कोसं जीवो उसंवसे ॥ कालं संखाईओ । समयं गोयम मा पमायए ॥६॥
तेउक्कायमइगओ । उक्कोसं जीवो उसंवसे ॥ कालं संखाईयं । समयं गोयम मा पमायए ॥७॥
वाउक्कायमइगओ । उक्कोसं जीवो उसंवसे ॥ कालं संखाईयं । समयं गोयम मा पमायए ॥८॥

(आउक्कायं अइगओ) अप्कायने पामेलो. (तेउक्कायं अइगओ) तेजस्कायने पामेलो. (वाउक्कायं मइगओ) वायुकायने पामेलो जीव ते ते कायामां असंख्यातो काळ रहे छे तथा हे गौतम, एक समयमात्र पण प्रमाद न करवो. ६-७-८

व्या०—तथाप्कायमधिगतो जीव उत्कृष्टमसंख्योत्सर्पिण्यवसर्पिणीमानं कालं संवसेत्, तस्मात् समयमात्रमपि मा प्रमादीः? ॥६॥ एवं तेजस्कायमग्निकायमधिगतो जीव उत्कृष्टं संख्यातीतं कालमसंख्योत्सर्पिण्यवसर्पिणीमानं कालं संवसेत्, तस्मात्समयमात्रमपि प्रमादं मा कुर्याः ॥७॥ एवं जीवो वायुकायमधिगतोऽप्युत्कृष्टमसंख्योत्सर्पिण्यवसर्पिणीप्रमाणकालं संवसेत्, तस्मात् समयमात्रमपि प्रमादं मा कुर्याः? ॥ ८ ॥

तथा=पूर्वकथित पृथ्वीकायनी पेठे=अप्काय=जलकायने पामेलो जीव उत्कृष्ट असंख्य उत्सर्पिणी अवसर्पिणी प्रमाण काल पर्यंत संवास करे छे माटे समयमात्र पण प्रमाद न करशो. एमज तेजस्काय अग्निकायने तथा वायुकायने पामेलो जीव उत्तरोत्तर उत्कृष्ट संख्यातीत=असंख्य उत्सर्पिणी अवसर्पिणी काल संवसे छे माटे हे गौतम! समयमात्र पण प्रमाद मा करो. ६-७-८

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





वणस्सइकायमइगओ । उक्कोसं जीवो उसंवसे ॥ कालमणंतं दुरंतं । समयं गोयम मा पमायए ॥९॥
बेंदियकायमइगओ । उक्कोसं जीवो उसंवसे ॥ कालं संखिज्जसन्नियं । समयं गोयम मा पमायए ॥१०॥
तेंदियकायमइगओ । उक्कोसं जीवो उवसंवसे ॥ कालं संखिज्जसन्नियं । समयं गोयम मा पमायए ॥११॥
चउरिंदियकायमइगओ । उक्कोसं जीवो उसंवसे ॥ कालं संखिज्जसन्नियं ।समयं गोयम मा पमायए ॥१२॥
पंचिंदियकायमइगओ । उक्कोसं जीवो उसंवसे ॥ सत्तट्ठभवग्गहणे । समयं गोयम मा पमायए ॥१३॥

व्या०—जीवः संसारी वनस्पतिकायमधिगत उत्कर्षत उत्कृष्टं कालमनंतमुत्सर्पिण्यवसर्पिणीमानमनंतकायिकापेक्षं वसेत्, कथंभूतमनंतं कालं? दुरंतं, दुष्टोऽन्तो यस्य स दुरंतस्तं, ते हि वनस्पतिकायमधिगता जीवास्तस्थानादुध्धृता अपि प्रायो विशिष्टं नरादिभवं न लभंते, तस्माद् दुरंतमिति विशेषणं. तस्मात् समयमात्रमपि प्रमादं मा कुर्याः? ॥९॥ द्वींद्रियकायं जीवोऽधिगतः सन्नुत्कृष्टं कालं संख्यातसंज्ञकं संख्यातासंख्यातवर्षसहस्रात्मकं कालं द्वींद्रियकायं तिष्ठेदित्यर्थः, तत्समयमात्रमपि गौतम मा प्रमादं कुर्याः.॥१०॥एवं जीवस्त्रींद्रियकायमधिगतः संख्यातवर्षसहस्रात्मकं कालमुत्कृष्टं वसेत, तेन त्वं समयमात्रमपि प्रमादं मा कुर्याः? ॥११॥ एवं जीवश्चतुरिंद्रियकायेऽधिवसन् संख्यातवर्षसहस्रात्मकं कालमधिवसेत, तस्मात्त्वं प्रमादं समयमात्रमपि मा कुर्याः? ॥१२॥ पंचेंद्रियकायमधिगतः पंचेंद्रियत्वं प्राप्तः सन्नुत्कृष्टं सप्ताष्टभवग्रहणे संवसेत्, सप्ताष्टौ वा परिमाणं येषां ते सप्ताष्टाश्च ते भवाश्च सप्ताष्टभवास्तेषां ग्रहणं सप्ताष्टभवग्रहणं, तस्मिन्. यदा हि पंचेंद्रियो मृत्वा पंचेंद्रियो भवेत्तदोत्कृष्टं सप्ताष्टवारं स्यादित्यर्थः. तस्मा-

For Private and Personal Use Only

त्समयमात्रमपि मा प्रमादीः? कश्चित्पुण्यवान् संख्यातायुष्को जीवः सप्तभवान् करोति, कश्चिदसंख्यातायुष्को जीवोऽष्टभवान् वा करोति, एवं ज्ञात्वा प्रमादो न विधेयः. ॥१३॥

संसारी जीव वनस्पतिकाय [वड पीपळा आदि] ने पामेलो उत्कर्षथी अनंत=उत्सर्पिणी अवसर्पिणी प्रमाण काल ( अनंतकायिकापेक्षाथी ) वसे छे. केटलो काळ? अनंत तथा दुरन्त, एटले जेनो अंत=परिणाम दुष्ट होय एटला काळ पर्यंत संवास करे छे. वनस्पतिकायने पामेला जीवो ते स्थानमांथी उधृत थइने पण प्रायः विशिष्ट स्थान=नरादिभव पामता नथी तेथी 'दुरंत' विशेषण कह्युं; माटे समयमात्र प्रमाद मा करो. बेंदियकाय० तेंदियकाय० चउरिन्दिकाय० पंचिंदियकाय०, द्वींद्रियकायने तथा त्रींद्रियकायने अने चतुरिंद्रियकायने पामेलो जीव उत्कृष्टकाळे संख्यात संज्ञक=असंख्यात वर्ष सहस्रात्मकाळपर्यंत अधिवास करे छे, माटे हे गौतम किंचिन्मात्र समय पण प्रमाद मा करो. पंचेंद्रियकायने पामेलो जीव, उत्कृष्ट सात आठ भव ग्रहणमां संवसे छे माटे गौतम! समयमात्र पण प्रमाद माकरो. पंचेंद्रियकायने अधिगत=पामेलो जीव उत्कृष्टपर्वडे सात आठ भव ग्रहणकरतो संवास करे छे, अर्थात् सात अथवा आठ भवनुं ग्रहण करे छे, कोइ संख्यात आयुष्यवाळो जीव सात भवनुं ग्रहण करे छे अने कोइक असंख्यातायुष्क जीव आठ भव कहे छे, एम जाणीने हे गौतम समय मात्र पण प्रमाद न करवो. ९-१०-११-१२-१३

देवे नेरइमइगओ । उक्कोसं जीवो उसंवसे ॥ इक्केकभवग्गहणे । समयं गोयम मा पमायए ॥ १४ ॥

(देवे) देवपणाने तथा (नेरइए) नारकीपणाने (अइगओ) पामेलो (जीवो उ) जीव [उक्कसं] उत्कर्षथी [इक्किक्कभवग्गाहणे] एक एक भव ग्रहणने वि [संवसे] रहे छे, तेथी [गोयम] हे गौतम! [समयं] १४

व्या०—देवे देवभवे नरके नरकभवेऽधिगतः संसारी जीव उत्कृष्टमेकैकस्मिन् भवग्रहणे संवसेत्, तस्मात्समय-मात्रमपि प्रमादं मा कुर्याः? देवो मृत्वा न स्यात्, नारको मृत्वा नारको न स्यात्, एकमन्यद्भवांतरं कृत्वा पश्चात्स्या-दित्यर्थः, तस्मादेकैकभवग्रहणमित्युक्तं. ॥१४॥

देवभवमां तथा नरकभवमां अधिगत=प्राप्त थयेलो संसारी जीव उत्कृष्ट एक एक भव ग्रहण करतो संवसे छे, माटे समयमात्र पण प्रमाद मा करो. देव मरीने पाछो कंइ देव नथी थतो, तेम नारकी मरीने नारकी नथी थवातुं. किंतु वच्चे एकाद भवांतर पामी पछीथी थवाय तेथी एक एक भवग्रहण कह्युं छे. १४

एवं भवसंसारे । संसरइ सुहासुहेहिं कम्मेहिं ॥ जीवो पमायबहुलो । समयं गोयम मा पमायए ॥१५॥

(एवं) उपर प्रमाणे (भवसंसारे) आ संसारने विषे (पमाय बहुलो) घणा प्रमादवाळो (जीवो) जीव (सुभासुहेहिं कम्मेहिं) शुभा-शुभ कर्मोए करीने (संसरइ) भ्रमण करे छे तेथी (गोयम) हे गौतम! (समयं) १५

एवमनुना प्रकारेण जीवो भवसंसारे भवभ्रमणे शुभाशुभैः कर्मभिः प्रेर्यमाणः संसरति पर्यटति. कीदृशो जीवः? प्रमादबहुलः, प्रमादो बहुलो यस्य स प्रमादबहुलः प्रमादवर्तीत्यर्थः, तस्मात्प्रमादस्य दुर्निवारत्वं ज्ञात्वा समयमात्रमपि प्रमादं मा कुर्याः ॥१५॥ मनुष्यत्वं प्राप्तस्याप्युत्तरोत्तरगुणाप्तिर्दुर्लभेत्याह—

एम=पूर्वोक्त प्रकारे=जीव, भवसंसारमां=भवभ्रमणमां शुभअशुभ कर्मो वडे प्रेरायेलो थको संसरे छे=भटके छे. केवो जीव? प्रमाद बहुल=जीवितकाळनो अधिकांश प्रमादमांज गाळनारो; माटे प्रमादथी बचवुं बहु दुष्कर जाणीने गौतम! समयमात्र पण

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





प्रमाद मा करशो. १५

लध्धूण वि माणुसत्तणं । आयरियत्तं पुणरेव दुल्लहं ॥ बहवे दसुया मिलच्छुया । समयं गोयम मा पमायए॥१६॥
[माणुसत्ताणं] मनुष्यपणुं [लध्धूण वि] पाम्या छतां पण [पुणरवि] फरीने तेमां (आरिअत्तं) आर्यपणुं [दुल्लहं] दुर्लभ छे [बहवे] घणा जीवो तो [दसुया] पर्वतादिकमां वसनारा [मिलच्छुआ] म्लेच्छ=अधर्मी तेथी करीने [गोयम] हे गौतम [समयं] १६

व्या०—मनुष्यत्वमपि लब्ध्वा आर्यत्वमार्यदेशोत्पत्तिभावं पुनरपि दुर्लभं, यद्यपि मनुष्यत्वं जीवः प्राप्नोति, तदाप्यार्यदेशे मनुष्यत्वं दुर्लभमित्यर्थः. यत्र देशेषु धर्माधर्मजीवाजीवविचारः स आर्यो देशस्तत्रोत्पत्तिर्दुर्लभा, पुनरपि बहवो जीवा दस्यवश्चौरा देशानां प्रांते पर्वतादिषु निवासकारिणस्तस्करा भवंति, म्लेच्छाः के? येषां वाक् सम्यक्केनापि न ज्ञायते ते म्लेच्छा उच्यंते. पुलिंदा नाहला नेष्टा । शबरा बरटा भटाः ॥ माला भिल्लाः किराताश्च । सर्वेऽपि म्लेच्छजातयः ॥१॥ तत्र च धर्माधर्मज्ञानं दुर्लभं, तस्मात्समयमात्रमपि प्रमादं मा कुर्याः? ॥१६॥

मनुष्यपणाने पामीने पण आर्यदेशमां उत्पन्न थवुं एतो फरी पण अति दुर्लभ छे. यद्यपि जीव मनुष्यत्व पामे तथापि आर्यदेशमां मनुष्यत्व तो अत्यंत दुर्लभ छे; जे देशोमां धर्म, अधर्म, जीव, अजीव, इत्यादि विचार रह्या छे ते आर्यदेश, ए देशमां उत्पत्ति अति दुर्लभ छे, वळी घणा जीवो तो दस्यु होय छे, एटले पर्यंत देशोमां पर्वतादिस्थानोमां रहेनारा तस्करो होय छे तेम केटलाकतो जेनुं बोलवुं आपणे समजी न शकीये तेवा म्लेच्छ होय छे, 'पुलिंद, नाहल, नेष्ट, शबर, वरट, भट, माल, भिल्ल तथा किरात; आ नवे म्लेच्छ जाति कहेवाय छे' एवी जातिमां धर्माधर्म ज्ञान दुर्लभज होय माटे हे गौतम! समये प्रमाद मा करो. १६

For Private and Personal Use Only

लध्धूण वि आयरियत्तणं । अहीणपंचेंदिअया हु दुलहा ॥ विगलिंदिअया हु दीसइ । समयं गोयम मा पमायए॥१७॥
[अरिअत्तणं] आर्यपणुं [लध्धूण वि] पामीने पण [अहीण पंचेंदिअया] पंचेंद्रियपणुं [दुलहा हु] प्राप्त थवुं दुर्लभ छे कारण के (विगलिंदिअया) विकलेंद्रियता होय [हु] बहोळताए [दीसइ] जोवामां आवे छे तेथी (गोयम) गौतम! (समयं) १७

व्या०—आर्यत्वमार्यदेशोत्पत्तिभावमपि लब्ध्वा, हु इति निश्चये, अहीनपंचेंद्रियता पुनर्दुर्लभा, हु इति बाहुल्येन बहूनां विकलेंद्रियता दृश्यते, विकलानि रोगाद्युपहतानींद्रियाणि येषां ते विकलेंद्रियास्तेषां भावो विकलेंद्रियता, सा दृश्यते. बहवो हि दुःकर्मवशाद्रोगोद्रेकेण विगतनेत्रश्रवणरसनस्पर्शनचरणवीर्या दृश्यंते, ते च धर्मानुष्ठानकरणेऽसमर्था भवंति, तस्मात्त्वं समयमात्रमपि हे गौतम! प्रमादं मा कुर्याः? ॥१७॥

आर्यत्व एटले आर्यदेशमां उत्पन्न थइने पण सर्वेन्द्रिय संपन्न होवुं अति दुर्लभ छे केमके घणा जणोमां कोइने कोइ इंद्रियनी विकलता जोवामां आवे छे, अर्थात् घणाय रोग शीतळाइत्यादिकथी आंख, कान, जीभ, स्पर्शेन्द्रिय, पग हाथ हलाववानुं सामर्थ्य जेनां नष्ट थयां होय तेवा जोवामां आवे छे अने तेथी तेओ धर्मानुष्ठान करवामां अशक्त बनी जाय छे तेथी हे गौतम! तमे समय=काळमात्र पण प्रमाद वश थशोमां. १७

अहीणपंचिंदियत्तं पि से लहे । उत्तमधम्मसुई हु दुल्लहा ॥ कुतित्थिनिसेवए जणे । समयं गोयम मा पमायए ॥१८॥
[अहीणपंचिंदित्तं] अन्यून पचेंद्रियपणाने पण [से] ते जीव कदाच (लहे) पामे तो पण (उत्तमधम्मसुइ) उत्तम धर्म श्रवण (दुल्लहा हु) दुर्लभछे कारण के (जणे) घणा लोको (कुतित्थिनिसेवए) कुतीर्थीओने सेवनारा होयछे. तेथी (गोयम) हे गौतम! (समयं)

व्या०—से इति स जीवोऽहीनपंचेंद्रियत्वमपि चेल्लभेत तदापि हु इति निश्चयेनोत्तमधर्मश्रुतिर्दुर्लभा, जिनधर्मस्य श्रवणं दुःप्राप्यमित्यर्थः. तत्र हेतुमाह—जनो लोकः कुतीर्थिनां मिथ्यात्विनां निषेवकः, कुतीर्थिनो हि सत्कारयशोलाभार्थिनो भवंति, ते च प्राणिनां विषयादिसुखसेवनोपदेशेन वल्लभत्वमुत्पाद्य जनान् रंजयंति, अतस्तेषां सेवा सुकरा, तेषां मुखाद्धर्मवार्ता कुत इत्यर्थः. १८

'से' ते जीव अहीन पंचेंद्रियत्व पण कदाच पामे तारे पण 'हु'=निश्चये उत्तम धर्म=जिनधर्मनुं श्रवण दुष्प्राप्य छे, तेमां हेतु कहे छे जनो लोको कुतीर्थि निषेधक थाय छे;-कुतीर्थि=मिथ्यात्वीना अनुयायी थइ जाय छे, केमके कुतिर्थिओ सत्कार यश तथा लाभना अर्थी होय छे तेथी तेओ प्राणीओने विषयादिसुख सेववानो उपदेश करी लोकोना वहाला बनी जनोने रंजीत करे छे आथी तेवाओनी सेवा सुकर लागे छे. एवाओना मुखेथी धर्मवार्त्ता सांभळवानुं क्यांथी मळे? माटे हे गौतम! समये प्रमाद न करो. १८

लध्धूण वि उत्तम सुइं । सद्दहणा पुणरवि दुल्लहा ॥ मित्थत्तनिसेवए जणे । समयं गोयम मा पमायए ॥१९॥

(उत्तमं) उत्तम धर्मनुं (सुइं) श्रवण (लध्धूणवि) पामीने पण (पुनरवि) पुनः (सद्दहणा) श्रद्धा थवी [दुल्लहा] दुर्लभ छे [जणे] घणा माणसो (मिच्छत्तनिसेवए) मिथ्यात्वने सेवनारा छे तेथी (गोयम) हे गौतम (समयं) १९

व्या०—उत्तमधर्मस्य श्रुतिमपि लब्ध्वा पुनः श्रद्धा दुर्लभा । तत्त्वरुचिर्दुःप्राप्या, यतो हि जनो लोका मिथ्यात्वनिषेवकः स्यात्, मिथ्यात्वं हि कुगुरुकुदेवकुधर्मलक्षणं नितरां सेवते इति मिथ्यात्वनिषेवकः, तस्मान्मिथ्यात्वोद्याज्जिनधर्मरुचिर्दुर्लभा, तस्मात्समयमात्रमपि त्वं मा प्रमादीः? १९

उत्तम धर्मनी श्रुति पामीने फरी श्रद्धा दुर्लभ छे=तत्त्वमां रुचि थवी दुष्प्राय होय छे; कारण के जन=लोक, मिथ्यात्व सेवी थाय छे तेथी तेओमां मिथ्यात्वनो उदय थवाथी तेओनी जिनधर्ममां रुचि दुर्लभ थायछे तेथी हे गौतम! समयमात्र पण तमे प्रमाद मा करशो.



धम्मं पि हु सद्दहंतया । दुल्लाहया काएण फासया ॥ इह कामगुणेसु मुच्छिया । समयं गोयम मा पमायए ॥२०॥

[धम्मं] धर्मने [सद्दहंतया पिहु] सद्दहता थका पण [काएण] तेने कायावडे [फासया] स्पर्श करनारा [दुलहया] अति दुर्लभ छे कारण के [इह] आ जगतमां [कामगुणेसु] कामभोगने विषे [मुच्छिआ] मूर्छावाळा होय छे छतां [गोयम] हे गौतम! [समयं]

व्या०—धर्मं जिनोक्तं धर्मं श्रद्दधतः, जिनोक्तमागमं साधुश्राद्धधर्मं वा सर्वं सत्यमिति जानतोऽपि जीवस्य कायेन शरीरेण, कायग्रहणेन कायसंबद्धयोर्वागमनसोरपि ग्रहणं, तस्मात्कायेन वचसा मनसा च स्पर्शना दुर्लभिका, धर्मक्रियानुष्ठानकरणं दुःकरमित्यर्थः. इह जगति जीवाः कामगुणेषु विषयेषु मूर्छिता लोलुपा भवंति, विषयिणो हि धर्मक्रियास्वयोग्याः, हे गौतम! धर्मक्रियानुष्ठानकरणं दुःकरमिति समयमात्रमपि प्रमादं मा कुर्याः? ॥२०॥

धर्म=जिनोक्त धर्मने श्रद्धाथी पामीने पण, अर्थात्–जिनोक्त आगम तथा साधुश्राद्धधर्म सर्व सत्य छे एम जाण्या छतां पण जीव, कायावडे=(अहिं 'काय' शब्दथी काया साथेना वाणी तथा मननुं ग्रहण करवानुं छे) काया मन तथा वाणी वडे स्पर्शना=धर्मक्रियानुं आचरण करवुं ए तो अति दुर्लभ=दुष्कर=छे. आ जगत्मां जीवो काम गुणोमां मूर्छित=लोलुप होय छे, एटले विषयीजनो धर्मक्रियामां अयोग्य गणाय तेथी हे गौतम! धर्मक्रियाओनुं अनुष्ठान करवुं ए अति दुष्कर होवाथी समयमात्र पण प्रमाद मा करशो. २०

परिझूरइ ते सरीरयं । केसा पांडुरया हवंति ते ॥ से सोयबले य हायई । समयं गोयम मा पमायए ॥२१॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



[ते] तारुं [सरीरयं] शरीर [परिजूरइ] सर्व प्रकारे जीर्ण थाय छे तथा [ते] तारा [केसा] केशो (पंडुरया) वृद्धावस्थाने लीधे श्वेत [हवंति] थाय छे [अ] तथा [से] ते [सोअप्पते] श्रवणेंद्रियनुं बळ [हायइ] हानि पामे छे माटे [गोयम] हे गौतम! (समयं) २१

व्या०—हे गौतम! ते शरीरकं परिजीर्यति, परि समंतात्सर्वप्रकारेण वयोहानिजरया जीर्णत्वमनुभवति, तव पुनः केशाः पांडुरकाः श्वेता भवंति, अत्र ते तवेति कथनात्प्रत्यक्षानुभवेन संदेहो न कर्तव्यः, यथा हस्तकंकणस्यात्मदर्शावलोकनं. यथा तव शरीरं तथा सर्वेषामेव ज्ञेयमित्यर्थः. से इति तच्छ्रोत्रबलं हीयते हीनं स्यात्, तच्छब्दग्रहणाच्छब्दग्रहणं कर्तव्यं, यत् श्रोत्रयोर्बलं तरुणावस्थायां स्यात्तद् वृद्धावस्थायां हीयत इत्यर्थः. अत्र पूर्वं श्रोत्रग्रहणं धर्मश्रवणत्वख्यापनार्थं, यतो हि धर्मश्रवणादेव धर्मकरणमतिः स्यादित्यर्थः, तस्मात् श्रोत्रबले सति धर्मश्रवणादरः कर्तव्यः, तत्र समयमात्रमपि त्वं मा प्रमादीः? ॥२१॥

व्या०— अत्र 'भवयाणं' इति भवतां एतत् समीपतरवर्ति अन्नं प्रभूतं, अद्यते इत्यन्नं भक्ष्यं प्रभूतं प्रचुरं विद्यते. तदेव प्रचुरत्वं दर्श्यते, 'वियरिज्जइ' इति वितीर्यते दीनहीनानाथेभ्यः सर्वेभ्यो वितीर्यते विशेषेण दीयते, पुनः खाद्यते खज्जकघृतपूरादिकं सशब्दं भक्ष्यते, पुनर्भुज्यते तंडुलमुद्गदाल्यादि सघृतमाकंठं अभ्यवहार्यते. इत्यनेन अत्र काचित्कस्यापि भक्ष्यवस्तुनी न्यूनता न दृश्यते. यूयं मे इति मां याचनजीविनं जानीत? याचनेन भिक्षया जीविनं जीवितव्यं अस्येति याचनजीवी; तं, इति अस्मात्कारणात् तपस्वी मल्लक्षणो मुनिरपि; अत्र शेषावशेषं शेषादपि शेषं शेषावशेषमुद्धरितं प्रांतप्रायमाहारं लभतां प्राप्नोतु, इत्यपि यूयं जानीत. कोऽर्थः? स मुनिरवादीत्; अत्र अन्नं यत्र तत्र परिष्ठाप्यते, भवद्भिरेतादृशी बुद्धिः करणीया, अयं तपस्वी आहारार्थमागतोऽस्ति; अयमपि शेषावशेषमाहारं प्राप्नोतु, इति विचार्य मह्यं शुद्धमाहारं दीयतामिति दीयतामिति यक्षेणोक्ते सति ते ब्राह्मणाः किं प्राहुरित्याह ॥१०॥

तमारुं आ=पांसे पडेलुं=खावा योग्य पुष्कळ अन्न छे; (पुष्कळपणुं दर्शावे छे. दीन, हीन, अनाथ वगेरे सर्वेने अपाय छे; फरी खाजा वगेरे खवाय छे तेमज दाळ भात आदिक घी नाखीने जमाय छे, अर्थात् अहीं कोइ जातनी न्यूनता नथी तो पछी याचनजीवी=याचन–भिक्षा उपर जीववावाळा मारा जेवो तपस्वी पण, शेषमांथी पण बचेलुं प्रांत प्राय आहार भले पामे एम जाणो.

ते मुनि एम बोल्या के-अत्रे अन्न तो ज्यां त्यां नखाय छे तो तमारे एवी बुद्धि राखवी के-आ तपस्वी आहार माटे आव्यो छे तो ए पण अवशेष आहार भले पामे-आम विचारीने मने शुद्ध आहार दीओ-एम यक्षे कह्युं त्यारे ते ब्राह्मणा शुं बोल्या ते कहे छे

उवक्खडं भोयणमाहणाणं । अत्तट्ठियं सिद्धं इहं एगपक्खं ॥
न उ वयं एरिसमन्नपाणं । दाहामु तुज्झं किमिहं ठिओसि ॥ ११ ॥

[माहणाणं] ब्राह्मणोनुं (अत्तट्ठिअं) पोताना माटेज थयेलुं (उवक्खडं) संस्कार करेलुं (भोअण) भोजन (इह) अहीं [सिद्धिं] सिद्ध कर्युं छे ते (एगपक्खं) फक्त एक पक्ष माटे अर्थात् ब्राह्मणो माटे छे. (एरिसं) आवो जातनुं (अन्न पाणं) अन्न पाणी (वयं) अमे (तुब्भं) तने [न हु दाहामु] नहींज आपीए [किमिहं] केम अहीं (ठिओ सि) तुं उभो रह्यो छुं. ११

व्या०—रे भिक्षो ! इहास्मिन् यज्ञपाटके भोजनं यदुपस्कृतं घृतहिंग्वाधान्यकमिरचलवणजीरकादिभिः कृतोपस्कारं शाकादि, पुनरिह सिद्धं चतुर्विधाहारं राद्धं वर्तते. एकः पक्षो ब्राह्मणो यस्य तत् एकपक्षं, एतदाहारं शूद्रेभ्यो न देयमस्ति, ब्राह्मणानां वर्तते, पुनरिदमाहारमार्थिकं, आत्मार्थे भवमात्मार्थिकं, ब्राह्मणैरप्यात्मा नैव भोज्यं, न त्वन्यस्मै कस्मैचिद्देयमित्यर्थः. तु इति तेन हेतुना वयमेतादृशं ब्राह्मणभोज्यमन्नपानं तुभ्यं न दास्यामः. इह त्वं किं स्थितोऽसि? अस्माकं धर्मशास्त्रे उक्तमस्ति-न शूद्राय मतिं दद्या-न्नोच्छिष्टं न हविःकृतं ॥ न चास्योपदिशेद्धर्मं । न चास्य व्रतमादिशेत् ॥१॥ ११ ॥ तदा यक्षः पुनः पुनरवादीत्—

हे भिक्षु! अहीं आ यज्ञवाटमां जे भोजन घी, हींग, धाणा, मरिच, लवण, जीरुं इत्यादिकथी वघारेल शाकादिक तथा सिद्ध

रांधेल चतुर्विध आहार वगेरे छे ते एक पक्ष=मात्र ब्राह्मणोनाज अर्थनुं छे. शूद्रोने न देवाय, तेवुं ब्राह्मणनुं छे वळी आ आत्मार्थिक=ब्राह्मणोये पण पोतेज जमवानुं अन्यने कोइने देवाय नहिं तेवुं छे ए कारणथी अमे ब्राह्मण भोज्य अन्नपान तने नहिं आपी शकीए. अहीं तुं शा माटे उभो छे? अमारा धर्म शास्त्रोमां कह्युं छे के-'शूद्रोने आत्मज्ञान न आपवुं, हविष्यनुं शेष न देवुं, तेने धर्मोपदेश न करवो तेम तेने कोइ व्रतादेश पण न करवो'. ११ त्यारे यक्ष फरीने बोल्यो के—

थलेसु बीयाइं ववंति कासया । तहेव निन्नेसु य आससाए ॥
एयाइ सद्धाइ दलाहि मज्झं । आराहए पुण्णमिणं खु खेत्तं ॥ १२ ॥

(कासगा) खेडुतलोको (बीआइ) धान्यबीजने (थलेसु) भूमिने विषे [तेहेव] तेमज (निन्नेसु अ) नीची भूमिने विषे [आससाए] आशाए करीने [वपंति] वावे छे माटे [ए आइ] आवा (सद्धाइ) श्राद्धवडे करीने (मज्झं) मने (दलाहि) आपो. (इणं) आ=हुं [पुण्णं] पुन्य (खित्तं) क्षेत्ररूप छुं [खु] अवश्य (आराहए) आराधो. १२

व्या०—एतया अनया उपमया श्रद्धया भावनया मह्यं दद्ध्वं? खु इति निश्चयेन इदं मल्लक्षणं पुण्यं शुभं क्षेत्रमाराधयत? एतया इति कया उपमया? तामुपमामाह—कर्षकाः क्षेत्रीकारका नरा आशंसया विचारणया काले वर्षाकाले स्थलेषु उच्चप्रदेशेषु, तथैव निम्नेषु निम्नभूमिप्रदेशेषु बीजानि वपंति. कोऽर्थः? वर्षाकाले क्षेत्रीकारका बीजं वपंत एवं चिंतयंति, यदि प्रचुरा वर्षा भविष्यंति, तदा स्थलेषु फलावाप्तिर्भविष्यति, यदि चाल्पा वर्षा भविष्यंति, तदा निम्नप्रदेशेषु फलावाप्तिर्भविष्यति. उभयत्रोच्चनीचप्रदेशेषु बीजं वपंति, न पुनरेकत्रैव बीजं वपंति. यदि यूयं ब्राह्मणा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





निम्नभूमिसदृशास्तदाहं स्थलभूमिसदृशो गण्यः मह्यमपि दातव्यं, न केवलं यूयमेव क्षेत्रप्रायाः, किंत्वहमपि पुण्यक्षेत्रमस्मीति भावः ॥ १२ ॥ इति श्रुत्वा ते ब्राह्मणास्तं प्रत्यूचुस्तदाह—

आ उपमा–श्रद्धाभावना राखी मने दीओ. ते उपमा कहे छे–कर्षक–खेती करनार नरो आशंसा=धारणाथी काले=वर्षासमये स्थळ=उंचा प्रदेशोमां तथा निम्न=नीचा भूमिप्रदेशोमां पण बीजो वावे छे. प्रयोजन शुं? वर्षाकाले खेडुत बीज वावतां एम विचारे छे के जो पुष्कळ वृष्टि थशे तो स्थलभूमिमां फळ प्राप्ति थशे, कदि अल्प वृष्टि थइ तो नीची भूमिमां फळ प्राप्ति थशे आम धारी उंचा नीचा बन्ने प्रदेशोमां बीज वावे छे. हवे तमे जो निम्न भूमिसमान हो तो मने स्थल प्रदेश जेवो गणीने कंइक देवुं जोइए. कंइ तेमज एकला क्षेत्र तुल्य छो एम नथी किंतु हुं पण पुण्य क्षेत्र छुं. १२ आ वचन सांभळी ब्राह्मणो तेना प्रति बोल्या ते कहे छे.

खेत्ताणि अम्हं विइयाणि लोए । जहिं पकिण्णा विरुहंति पुण्णा ॥
जे माहणा जाइविज्जोववेया । ताइं तु खित्ताइ सुपेसलाइ ॥ १३ ॥

[अम्हं] अमो (लोए) लोकोने (खेत्ताणि) क्षेत्रा [वइआणि] जाणेला छे [जहिं] जे क्षेत्रोमां [पकिण्णा] वावेलां बीज [पुण्णा] परिपूर्ण (विरुहंति) उगे छे. कारणके (जे माहणा) जे ब्राह्मणो (जाइविज्जोववेआ) चतुर्दशविद्या संपन्न छे [ताइं] तेओज [सुपेसलाइं] उत्तम (खित्ताइं) क्षेत्र छे. १३

व्या०—अरे पाखडपाश! तानि क्षेत्राण्यस्माभिर्विदितानि वर्तंते इति अध्याहारः. जहिमित्यत्र क्षेत्रेषु प्रकीर्णान्युप्तानि बीजानि प्रदत्तानि दानानि पूर्णानि विरुहंति विशेषेणोद्गच्छंति, फलदानि भवंति, विभक्तिलिंगव्यत्ययस्तु प्राकृ-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तत्वात. ये ब्राह्मणा जातिविद्योपपेतास्ते तु ब्राह्मणाः,सुतरामतिशयेन पेशलानि मनोहराणि क्षेत्राणि ज्ञेयानि. तत्र जातिर्ब्राह्मणत्वं, विद्या वेदाध्ययनं, जातिश्च विद्या च जातिविद्ये, ताभ्यामुपपेताः सहिता जातिविद्योपपेताः. 'उपअ-पइताः' इत्यत्र शकंध्वादिषु पररूपमित्यनेनोपशब्दस्याकारलोपे पश्चाद्गुणेन सिद्धिः, यदुक्तं–सममश्रोत्रियदानं । द्विगुणं ब्राह्मणं ब्रुवे ॥ समस्रगुणमाचार्ये । अनंतं वेदपारगे ॥ १ ॥ इत्युक्तत्वाद्वेदपारगा ब्राह्मणाः पुण्यक्षेत्राणि. ॥१३॥ अथ यक्षः प्राह—

अरे पाखंड पाश! ते क्षेत्रो अमे जाणेलां छे; जे क्षेत्रोमां प्रकीर्ण=वावेलां बीज (दीधेलां दान) पूर्ण रीते उगे छे=फळदेनारां नीवडे छे. (प्राकृत होवाथी विभक्ति तथा लिंगनो व्यत्यय थाय छे.) जे ब्राह्मणो जाति=ब्राह्मणकुळमां जन्म तथा विद्या=वेदाध्ययन आ बन्नेवडे सहित हो, (उप अत्र इत, अहीं शकंध्वादि मानी पररूप थतां 'उपपेत' पद थाय छे) तेओज सुतरां पेशल मनोहर क्षेत्र जाणवां. कह्युं छे के—अश्रोत्रियने आपेलुं दान, दीधेल पदार्थ जेटलुंज फळ आपे छे, सदाचारने आपेलुं द्विगुण फळ दीये तथा आचार्यने आपेलुं सहस्रगुण फळदायक थाय अने वेदना पारने पामेलाने आपेलुं दान अनंतगुण फळ आपे छे, माटे वेदपारग ब्राह्मणो पुण्यक्षेत्ररूप छे. १३

कोहो य माणो य वहो य जेसिं । मोसं अदत्तं च परिग्गहं च ॥
ते माहणा जाइविज्जाविहीणा । ताइं तु खित्ताइं सुपावगाइं ॥ १५ ॥

(जेसिं) जेओने (कोहो अ) क्रोध छे (माणाओ) मान आदि छे तथा (वहो अ) वध छे (मोसं) मृषावाद छे तथा (अदत्तं) चोरी छे

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





[परिग्गहो अ] गोभूमि आदिक परिग्रह स्वीकारे छे (ते माहणा) तेवा ब्राह्मणो [जातिविज्जाविहीणा] जाति अने विद्या ए बन्नेथी रहित छे. १४

व्या०—भो ब्राह्मणाः! येषां भवतां मध्ये क्रोधो वर्तते, च पुनर्मानमायालोभाश्च वर्तते, चकारान्मानादीनां ग्रहणं, च पुनर्वधो जीवहिंसा वर्तते, मृषावादश्चास्ति, अदत्तमदत्तादानमप्यस्ति, च शब्दान्मैथुनं कामासक्तिरस्ति, च पुनः परिग्रहो वर्तते, यूयं के ब्राह्मणाः? जातिविद्याविहीनाः, क्रियाकर्मविशेषेण चातुर्वर्ण्यं व्यवस्थितमिति वचनात्, ब्राह्मणत्वजातिमान् ब्राह्मणः, ब्राह्मणब्राह्मणीभ्यामुत्पन्नो ब्राह्मणो नोच्यते, किंतु ब्रह्मणत्वेन ब्राह्मणः क्रियानिष्टत्वेन ब्रह्मणि स्थितेन जातिधर्मेण विशिष्टो ब्राह्मण उच्यते. तस्माद्युष्मासु ब्रह्मक्रियानिष्टत्वब्राह्मणत्वस्याभावान्न जातिरस्ति, ब्राह्मणा ब्रह्मचर्येणेति लक्षणोक्तित्वात्. न पुनर्यूयं विद्यायुक्ताः, विद्यायास्तु विरतिरूपफलाभावात्. विद्यावानपि विरतिमान् सन् यावदाश्रवान् संवरद्वारेण न रुणद्धि तावत्स विद्यावान्नोच्यते, विद्या अपि परमार्थतस्ता एवोच्यंते, यासु पंचाश्रवपरिहार उक्तः, तस्मान्न भवंतो विद्यवंतः, भवत्सु भवदुक्तमेव जातिविद्योपपेतत्वं ब्राह्मणलक्षलक्षणं सर्वथा नास्त्येव, तस्मात्तानि सुपापकान्येव क्षेत्राणि भवंतः, न पुण्यक्षेत्राणि यूयं. ॥ १४ ॥ अथ कदाचित्ते एवं वदेयुः, वयं वेदविदो वर्तामहे इत्याह—

यक्ष कहे छे–हे ब्राह्मणो! जेओमां क्रोध, मान, माया लोभ. ('च' पद छे तेथी मानादिकनुं ग्रहण थाय छे.) तथा वध=जीवहिंसा वगेरे होय; मृषावाद=असत्यभाषण, अदत्तादान=चौर्य तथा कामासक्ति अने परिग्रह होय तेवा तमे ब्राह्मणो जातिविद्याविहीन

For Private and Personal Use Only

क्रियाकर्म विशेषथी चातुर्वर्ण्य व्यवस्थित छे, ब्राह्मणत्व जातिमान् ब्राह्मण, ब्राह्मण ब्राह्मणी युग्मथी उत्पन्न थवाथीज मात्र ब्राह्मण न कहेवाय किंतु ब्राह्मणत्व=ब्रह्मक्रियानिष्ठत्व वडे करीने-ब्रह्ममां स्थित पामेलो जातिधर्मे करी विशिष्ट होवाथी ब्राह्मण कहेवाय; माटे तमारामां ब्रह्मक्रियानिष्ठत्व न होय तो जाति न मनाय, ब्राह्मणो तो ब्रह्मचर्यवडे लक्षित कहेवाय छे. तमे विद्यायुक्त नथी जणाताता विद्यानुं फळ विरति नथी देखाती. विद्यावान जो विरतिवाळो थइ यावत्पर्यंत आश्रवोनो संवर द्वारा निरोध न करे त्यां सूधी विद्वान् न कहेवाय. परमार्थतः विद्या एज कहेवाय के जेमां पंचआश्रवोनो परिहार कहेल छे; ते कारणथी तमे विद्यावान जणाता नथी. तमारामां तमे कहेलुं जातिविद्योपपेतत्व ब्राह्मणलक्षण सर्वथा नथी तेथी तमे पापक क्षेत्र छो पुण्यक्षेत्र नथी. १४

'अमे वेदवित् छइए' एम कदाच तेओ कहे तो ते संबंधे कहे छे—

---

तुब्भत्थ भो भारहरा गिराणं। अट्ठं न जाणाह अहिज्ज वेए॥ उच्चावयाइं मुणिणो चरंति। ताइं तु खित्ताइं सुपेसलाइं॥१५॥

(भो) हे ब्राह्मणो! [इत्थ] आ जगतमां (तुब्भ) तमो मात्र (गिराणं) वाणीना (भारधरा) भारने धारण करनारा छो कारण के [वेए] वेदविद्याने [अहिज्ज] भणीने पण (अट्ठं) तेनो अर्थ [न याणाह] तमो जाणता नथी हवे उत्तम क्षेत्र कयुं? (मुणिणो) ने मुनिओ (उच्चावयाइं) भेदभाव विना भिक्षा माटे (चरंति) अटन करे छे तेथी [ताइंतु] तेओज (सुपेसलाइं) उत्तम (खित्ताइं) क्षेत्रो छे. १५

---

व्या०—भो इत्यामंत्रणे, भो ब्राह्मणाः! यूयं गिरां वेदवाणीनां भारहरा भारोद्वाहकाः, यतो यूयं वेदानधीत्य वेदानामर्थं न जानीथ. तथाहि-आत्मा रे ज्ञातव्यो मंतव्यो निदिध्यासितव्यः, पुनरयं समो मशके नागे च, न हिंस्यात् सर्वभूतानीत्यादिवेदवाक्यान्यधीतानि. अथ पुनर्भवद्भिर्जीवहिंसास्वेव प्रवर्त्यते, तस्मादत्र यागः पृथक् एव उच्यते,

यत्र चात्मनामग्नौ दाहः, स चात्र वेदे याग एव न स्यात्, यदि च स एव आत्मा एव भवद्भिर्न ज्ञातस्तदा किमर्थं यागं कुर्वीध्वं? प्रथमं यागोऽपि न भवद्भिर्ज्ञातः. कानि तर्हि क्षेत्राणीत्याह—हे ब्राह्मणाः! मुनीन् सुपेशलान्यत्यंतं सुंदराणि क्षेत्राणि जानीथ. ये मुनय उच्चावचगृहाण्युत्तमाधमानि कुलानि भिक्षार्थं चरंति. अथवा 'उच्चावयाइं' उच्चानि महांति व्रतान्युच्चव्रतानि येषां तान्युच्चव्रतानि, अकारः प्राकृतत्वात्, महाव्रतधराणि तानि क्षेत्राणि भव्यानि ज्ञेयानीत्यर्थः. ॥ १५ ॥ तदा छात्राः किं प्राहुः—

'भो' ए पद आमंत्रणार्थ छे. हे ब्राह्मणो! तमे वेदवाणीना भारने वहन करनारा छो कारण के तमे वेदनुं अध्ययन करीने ते वेदोना अर्थने जाणता नथी. जेमके—'आत्मा जाणवा योग्य छे, मनन करवा योग्य छे निदिध्यासन करवा योग्य छे.' वळी ते 'मशलामां तेमज हाथीमां समान छे' 'सर्व भूतनी हिंसा न करवी' इत्यादि वेदवाक्यो जाणीने जीवहिंसामां प्रवृत्ति कराय तो ए याग जुदाज प्रकारनो कहेवाय. ज्यां आत्मानो अग्निमां दाह थाय ते यागज न कहेवाय, ज्यारे तमे ए आत्माने न जाण्यो तो पछी याग शा माटे करो छो? प्रथम तो याग पण तमे बराबर नथी जाण्यो त्यारे क्या क्षेत्र जाणवा? ते कहे छे. हे ब्राह्मणो! जे मुनियो उंच नीच घरो=उत्तमाधम कुळोमां भिक्षा अर्थे चरे छे=फरे छे, ते मुनियोने सुंदर क्षेत्र जाणो. अथवा उच्चावच=उंचां महाव्रत जे धारे छे ते भव्य क्षेत्र समजवां. १५

अज्झावयाणं पडिकूलभासी। पभासते किंतु सगासि अम्हं ॥
अवि एयं विणस्सउ अन्नपाणं। न य णं दहामो य तुमं नियंठा ॥ १६ ॥

(अज्झावयाणं) अमारा उपाध्यायनी [पडिकूलभासी] प्रतिकूळ बोलनारो एवो तुं (अम्हं) अमारी (सगासि) समक्ष [किंतु] केम आवुं [पभाससे] असंबंद्ध (एअं) अप्रत्यक्ष [अन्नपाणं] अन्न अने पाणी [विणस्सउ अवि] भले विनाश पामो [निअंठा] हे निर्ग्रंथा [तुमं] तने (न य) नहींज [दाहासु] आपीए. हवे यक्ष कहे छे. १६

व्या०—किंत्विति शब्दौ निंदाक्रोधवाचकौ, अरे नियंठा! अरे दरिद्र! त्वमुपाध्यायानां प्रतिकूलभाषी सन्, अस्मत्पाठकानां प्रतिकूलभाषी सन्, अस्मत्पाठकानां सन्मुखवादी सन्नस्माकं सकाशेऽस्माकं प्रत्यक्षं प्रभाषसे, प्रकर्षेण यथा तथा भाषसेऽसंबद्धं वचनं ब्रूते, तस्मादरे एतदन्नपानं विनश्यतु, एतदाहारं सटतु पतत्वप्येतदाहारं तुभ्यमुपाध्यायप्रतिकूलवादिने न दद्मः. ॥ १६ ॥ तदा यक्ष आह—

किंतु ए बे शब्दो निंदा तथा क्रोधना सूचक छे. अरे निर्ग्रंथ!=दरिद्र! तुं अमारा अध्यापकोने सामे प्रतिकूळ भाषण करनारो, अमो पाठकोने सामे अमारी आगळ=प्रत्यक्षमां प्रकृष्टपणे असंबद्ध वचन बोले छे, तेटला माटे भले आ अन्नपान विनाश पामो, एटले ए आहार भले सडीजाओ पडी जाओ तथापि उपाध्यायने प्रतिकूल बोलनार तुं, तेने तो नहिंज दइये. १६

समिइहिं मज्झं सुसमाहियस्स । गुत्तिहिं गुत्तस्स जिइंदियस्स ॥
जई मे न दाइज्जइ एसणिज्जं किमज्ज जन्नाण लभित्थ लाभं ॥ १७ ॥

(मज्झं) मने [समइहिं] पांच समिति वडे [सुसमाहिअस्स] सारी समाधिवाळा (गुत्तीहिं) त्रण गुप्तिवडे (गुत्तस) गुप्त एवा [जीइंदिअस्स] जीतेन्द्रीय एवा [मे] मने [जइ] जो [अहएसणिज्जं] विशुद्ध एवो आहार (न दाहित्थ) नहीं आपो तो (अज्ज) आजे

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





(जण्णाण) यज्ञोनो [लाभं] लाभ [किं] शुं [लहित्थ] पामशो? हवे उपाध्याय जवाब आपे छे. १७

व्या०—यदि मे ममेहास्मिन् यज्ञपाटके शुद्धमेषणीयमाहारमस्मिन्नवसरे न दास्यथ, तदा यज्ञानां लाभं पुण्यप्राप्तिरूपं फलं किं लप्स्यथ? अपि तु न किमपीत्यर्थः. पात्रदानं विना किमपि न फलमित्यर्थः. कथंभूतस्य मम? तिसृभिर्गुप्तिभिर्गुप्तस्य, पुनः कीदृशस्य मम? पंचभिः समितिभिः सु अत्यंतं समाहितस्य युक्तस्य, पुनः कीदृशस्य मम? जितेन्द्रियस्य, जितानींद्रियाणि येन स जितेन्द्रियस्तस्य. अत्र चतुर्थीस्थाने षष्ठी, एतादृशाय पात्राय मह्यं येन यूयं प्रासुकमाहारं न दास्यथ तदा भवतां सर्वमपि वृथा, फलस्याभावात्. ॥ १७ ॥ अथोपाध्याय आह—

यदि=जो मने अहीं=आ यक्षवाटमां शुद्ध एषणीय आहार आ अवसरे देशो नहि तो पछी यज्ञोनो लाभ=पुण्यप्राप्तिरूप फळ शुं मेळवशो? कइ पण नहिं. हुं केवो? पांच समितिवडे अत्यंत युक्त तथा जितेंद्रिय=जेणे इंद्रियो जितेल छे एवो, (अहीं चतुर्थीने स्थाने षष्ठी विभक्ति छे) आवा पात्ररूप मने जो प्रासुक आहार आपशो नहिं तो पछी तमारुं सर्व वृथा छे=कंइ पण फळ नथी थवानुं.

के इत्थ खत्ता उवजोइया वा । अज्झावया वा सह खंडिएहिं ॥
एयं तु दंडेण फलेण हंता । कंठम्मि घित्तूण खलिज्ज तो णं ॥ १८ ॥

[इत्थ] अहीं (के) कया [खत्ता] क्षत्रियो छे? (उवजोइअ/ वा) अथवा रांधवानुं काम करनार कोण छे? अथवा [खंडिएहिं सह] विद्यार्थीओ सहित (अज्झावयवा) अध्यापको कोण छे? [जोणं] जे कोइ होय ते (एअं तु) आ साधुने (दंडेण) लाकडोथी [फलेण] बीलां आदिक फलथी (हंता) मारीने [कंठम्मि] कंठने विषे [घित्तूण] पकडीने [खलेज्ज] तेने स्थलना पमाडो. १८

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्या०—केचिदत्रास्मिन् यज्ञपाटके क्षत्राः क्षत्रिया उपज्योतिषः, अग्नेरुप समीपेऽग्निसमीपवर्तिनः पाकस्थानस्थाः, वाथवाध्यापका वेदपाठकाः संतोध्यव्याहारः, कथंभूताः पाठकाः? खंडितैश्छात्रैः सहिताः, ये एनं मुंडं दंडेन वंशयष्ट्या फलेन बिल्वादिना हत्वा, कंठं गृहीत्वा गलहस्तं दत्वा स्खलयेयुः, इतो यज्ञपाटकान्निष्कासयेयुः, तो इत्युक्तं तत्प्राकृतत्वात, ये इति वक्तव्यं, प्राकृतत्वाद्वचनव्यत्ययः. ॥ १८ ॥

कोइपण आ यज्ञवाटमां क्षत्र=क्षत्रियो तथा उपज्योतिष्क=अग्निनो समीपे वर्त्तनारा रसोया अथवा अध्यापको=वेदपाथको तेओना खंडिक=विद्यार्थिओ सहित होय ते आ मुंडने दंडवती=वांसनी लाकडीथी अथवा बीलां वगेरे फलो वडे हणी. कंठे पकडी गळे हाथ दइ स्खलित करी आ यक्षवाटमांथी निकाळी मेले. ये एम लखवुं जोइये तेने बदले तो कह्युं ते प्राकृत होवाथी वचन व्यत्यय थइ शके छे. १८

अज्झावयाणं वयणं सुणित्ता। उद्धाइया तत्थ बहुकुमारा॥ दंडेहिं वेत्तेहिं कसेहिं चेव। समागया तं इसिं तालयंति॥१९

(अज्झावयाणं) उपाध्यायनुं [वयणं] वचन (सुणित्ता) सांभळीने (बहूकुमारा) घणा कुमारो (तत्थ) त्यां (उद्धाइआ) दोड्या अने (समागया) एकत्र थया एम धारी तुरत (तं इसिं) ते ऋषिने (दंडेहिं) लाकडीओ वडे (वेतेहिं) नेतरनी सोटीथी (कसेहिं चेव) चाबुकवडे (तालयंति) ताडन करवा लाग्या. १९

व्या०—तत्र तस्मिन् यज्ञपाटके बहवः कुमारास्तरुणाश्छात्रा उद्धाविताः संतो दंडैर्वंशयष्टिभिर्वेत्रैजलवंशैः कशैश्चर्मदवरकैस्तमृषिं ताडयंति, कीदृशास्ते कुमाराः? समागताः संमीलयैकीभूयागताः. अहो क्रीडनकं समागतमिति



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वदंतो यष्ट्यादि सर्वं गृहीत्वा समागता इत्यर्थः तं मुनिं ताडयंति, किं कृत्वा? उपाध्यायानां वचनं श्रुत्वा. ॥१९॥

त्यां ते यज्ञवाट स्थानमां बहु=घणाय कुमारो=तरुण छात्रो (विद्यार्थिओ) दोडता आवीने दंड=वासनी लाकडीयो वती=तथा वेत्र=नेतरनी सोटीयोथी अने कशा=चामडाना चाबुकवडे ते ऋषिने ताडन करवा लाग्या. केवा ते कुमारो? समागत=मळीते आवेला, 'अहो रमवानुं मळ्युं' आम बोलता लाकडीओ वगेरे सर्व साधनो लइने आव्या. अने ते मुनिने ताडन करवा लाग्या, केम करीने? अध्यापकोनां वचन सांभळीने. १९

रण्णो तहिं कोसलिअस्स धुआ । भद्दत्ति नामेण अणिंदिअंगी ॥
तं पासिआ संजयं हम्ममाणं । कुद्धे कुमारे परिनिव्ववेइ ॥ २० ॥

(तहिं) ते यज्ञने विषे (अणिंदिअंगी) आनंदित अंगवाळी [भद्द त्ति नामेण] भद्रा एवी नामनी (कोसलिअस्स) कौशलिक नामना [रण्णो] राजानी [धूआ] पुत्री (तं) ते [संजयं] मूनिने [हम्ममाणं] हणाता (पासिआ) जोइने (कुद्धे कुमारे) क्रोध पामेला छात्रोने (परिनिव्ववेइ) शांत करवा लागी. २०

व्या०—तत्र कौशलिकस्य राज्ञः 'धूआ' इति सुता भद्रा वर्तते, सा भद्रा तं साधुं तैर्ब्राह्मणकुमारैर्हन्यमानं दृष्ट्वा क्रुद्धान् मारणोद्यतान् कुमारान् ब्राह्मणबालान् परिनिर्वापयति, वचनैरुपशमयतीत्यर्थः. कीदृशं तं साधुं? संयतं संयमावस्थायां स्थितं, कीदृशी सा भद्रा? अनिंदितांगी, अनिंदितमंगं यस्याः साऽनिंदितांगी शोभनशरीरा. ॥२०॥

त्यां कौशलिक राजानी धूआ=सुता भद्रा हती ते भद्रा ते साधुने ते ब्राह्मण कुमारोए हन्यमान=विडंबना कराता जोइने क्रुद्ध



For Private and Personal Use Only

मारवाने उद्यत थयेला कुमार=ब्राह्मण बालकोने वचन वडे उपशांत करवा लागी. केवा ते साधु? संयत=संयमावस्थामां स्थित. केवी ते भद्रा? अनिंदित छे अंग जेनां एवी; शोभन शरीरा. २०

देवाभिओगेण निओइएणं । दिण्णा मु रण्णा मनसा न झाया ॥
नरिंददेविंदभिवंदिएणं । जेणा मिहि वंता इसिं स एसो ॥ २१ ॥

(देवाभिओगेण) यक्षनाअभियोगवडे [निओइएणं] प्रेरायला एवा (रण्णा) मारा पिताए (दिण्णमु) मने एमने आपी हती [मणसा] मनवडे पण (न झीया) न इच्छी अने [नरिंददेविंदभिवंदिएणं] नरेंद्र अने देवेन्द्रोथी वंदना करायला एवा [जेण] जे-आ (इसिणा) ऋषिए [वंता] त्याग करेली [मि] हुं छुं [स एसो] तेज आ मुनि छे. २१

व्या०—सा भद्रा किमवादीत्तदाह-भो ब्राह्मणाः! एष स ऋषिर्वर्तते, येनर्षिणाहं वांताहं त्यक्तास्मि, कथंभूतेनर्षिणा? नरेन्द्रदेवेन्द्राभिवंदितेन, कीदृश्यहं? राज्ञा पुरा दत्तास्मै अर्पिता, अनेनर्षिणाहं राज्ञा पुरा दीयमानापि मनसापि न ध्याता नाभिलषिता, कीदृशेन राज्ञा? देवाभियोगेन नियोजितेन, देवस्य यक्षस्याभियोगो बलात्कारो देवाभियोगस्तेन यक्षदेवहठेन नियोजितेन प्रेरितेनेत्यर्थः. एतादृशोऽयं त्यागी मुनिरस्ति, तस्माद्भवद्भिर्न कदर्थ्यः, इति भद्रा राजकन्या ब्राह्मणानवादीत्. ॥ २१ ॥ पुनः सा किमाह—

ते भद्रा शुं बोली? ते कहे छे-हे ब्राह्मणो! आते ऋषि छे के जे ऋषिए मने वमन करी नाखी अर्थात् मारो त्याग करी नाख्यो हतो. केवो ऋषि? नरेन्द्र तथा देवोए अभिवंदित हुं केवी? राजाए पूर्वे आने अर्पण करेली, आ ऋषिए राजाए अर्पण

करेली मने छतां मनथी पण अभिलाष न करता त्यजी दीधी. के राजाए? देव=यक्षना अभियोग=बलात्कारवडे प्रेरायेला. एवा आ त्यागी मुनि छे, माटे तमारे तेने कचवावा नहिं; आम भद्रा राजकन्याए ब्राह्मणोने कहुं. २१

एसो हु सो उग्गतवो महप्पा। जिइंदियो संजयोबंभयारी॥
जो मे तया नेच्छइ दिज्जमाणिं पिउणा सयं कोसलिएण रण्णा॥ २२॥

[पिउणा] मारा पिता [कोसलिएण रण्णा] कौशलिक राजाए [सयं] पोतेज [दिज्जमाणिं] देवाती एवी (मे) मने [तया] ते वखते (जो) जे मूनि (निच्छइ) नहि इच्छना [सो हु एसो] तेज आ (उग्गतवो) उग्र तपवाळा (महप्पा) महात्मा [जीइंदिओ] जीतेन्द्रिय [संजओ] संयमी अने (बंभयारो) ब्रह्मचारी छे. २२

व्या०—हु इति निश्चयेनोपलक्षितो मयैषः, स उग्रतपा महात्मा वर्तते, उग्रं तपो यस्य स उग्रतपाः, महान् प्रशस्य आत्मा यस्य स महात्मा महापुरुषः, स इति कः? यस्तपस्वी कौशलिकेन पित्रा मम जनकेन राज्ञा स्वयमात्मना तदा दीयमानां मां नैच्छत् न वांछतिस्म. कीदृश एषः? जितेंद्रियः, पुनः कीदृशः? संयतः सप्तदशविधसंयमधारी, पुनः कीदृशः? ब्रह्मचारि ब्रह्मचर्यवान्. ॥ २२ ॥

हु=निश्चयपूर्वक में जाणेला आ ते महात्मा छे, अर्थात् उग्र जेनुं तप छे एवा महान्=प्रशस्य जेनो आत्मा छे तेवा महापुरुष छे. ते क्या? जे तपस्वीए कौशलिक पिता=मारा जनकराजाए स्वयं=पोते ते वखते देवा मांडेली मने इच्छी नहिं. मारी वांछना नज करी. आ केवा छे? जितेंद्रिय तथा संयत सत्तर प्रकारना संयमने धारण करनार अने ब्रह्मचर्यवान्. २२

महायसो एस महाणुभावो । घोरव्वओ घोरपरक्कमो य ॥
मा एयं हीलह अहीलणिज्जं । मा भे सव्वाण दहिज्जे एस ॥ २३ ॥

[एस] आ महामुनि (महाजसो) महायशवाळा छे, [महाणुभागो] महानुभाग छे [घोरव्वओ] घोर तपस्वी छे [घोरपरक्कमो अ] महापराक्रमी छे (अहीलणिज्जं) हीलना नहिं करवाने लायक [एअं] आ मुनिना [मा हीलह] हीलना तमे न करो (भे सव्वे) तमने सर्वने (तेएण] पोताना तेजवडे [मा निद्दहिज्जा] म बाळो. २३

व्या०—पुनरेष साधुर्महायशो वर्तते, पुनर्महानुभावोऽचिन्त्यातिशयः, पुनरेष घोरव्रतो दुर्धरमहाव्रतधारी, पुनर्घोरपराक्रमो रौद्रमनोबलः, क्रोधादिचतुःकषायाणां जये रौद्रसामर्थ्यस्तस्मादेनं तपस्विनं मा हीलयथ? कथंभूतमेनं? 'अहीलणिज्ज' अवगणनायायोग्यं स्तवनार्हमित्यर्थः, एष भे इति भवतो युष्मान् सर्वान्मानिर्धाक्षीन्न भस्मसात्कुर्वीत, इति यदा नृपपुत्र्योक्तं, तदा यक्षः किमकार्षीदित्याह—

वळी आ साधु महायशस्वी छे तेम महानुभाव=अचिंत्य अतिशयवाळा छे, तथा घोर व्रत=बीजाओथी न धारी शकाय तेवां महाव्रत धारण करनारा छे; घोर पराक्रम=रौद्रमनोबळवाळा एटले क्रोधादि चार कषायनो जय करवामां रौद्र=उग्रसामर्थ्यवान् छे तेथा आ तपस्वीने तमे तिरस्कारो मां. ए केवा छे? अवहेलन करवा योग्य=(स्तुति योग्य) छे तो आ तमने सर्वेने बाळी भस्म मा करो.

एवी रीते ज्यारे राजपुत्रीए कह्युं त्यारे यक्षे शुं कर्युं ते कहे छे—

एयाइं तीसे वयणाइ सुच्चा । पत्तीइ भद्दाइ सुभासियाइं ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इसिस्स वेयावडियट्ठयाए। जक्खा कुमारे विनिवारयंति ॥ २४ ॥

[पत्तीइ] रुद्रदेवनी पत्नी (तीसे) ते (भद्दाइ) भद्रना (एताइं) उपरोक्त कह्यां ते (सुभासिआइं) सारां कहेला [वयणाइं] वचनोने (सुच्चा) सांभळीने (इसिस्स) ऋषीनी [वेआवडिअट्ठायाए वैयावच्च माटे (जक्खा) यक्षो (कुमारे) ते छात्रोने [विनिवारयंति] नीवारे छे.

व्या०—यक्षाः परिवारसहिता ऋषेर्वैयावृत्त्यर्थं कुमारान् ब्राह्मणबालकान् विशेषेण निवारयंति, किं कृत्वा? तस्याः सोमदेवस्य यज्ञाधिपस्य पुरोहितस्य पत्न्या भद्राया वचनानि श्रुत्वा, कीदृशानि वचनानि? सुभाषितानि सुष्ठु भाषितानि. ब्राह्मणेभ्यः शिक्षारूपाणि प्रकाशितानि. ॥ २४ ॥

यक्षो-परिवार सहित एकठा थइ ऋषिना वैयावृत्य माटे कुमारो ब्राह्मण बाळकोने विशेषताथी निवारे छे, केम करीने? ते सोमदेव यज्ञाधिप पुरोहितनी पत्नी भद्राना, सम्यक्प्रकारे उच्चारेलां=ब्राह्मणोने शिक्षणरूपे प्रकाशित करेलां=वचनो श्रवण करीने.२४

ते घोररूवा ठिइयंतरिक्खे। अयुग्गा तहिं तं जणं तालयंति ॥
भिन्नदेहे रुहिरं वमंते। पासित्तु भद्दा इणमाहु भुज्जो ॥ २५ ॥

[घोररूवा] घोर रूपवाळा तथा (अंतलिक्खे) आकाशमां (ठिअ) रहेला तथा (असुरा) राक्षस जेवा (ते) यक्षो तहिं) त्यां (तंजणं) ते लोकोने [तालयंति] मारे छे, पछी (भिन्नदेहे) भेदेलां अंगवाळा (रुहिरंवमंते] रुधीरने वमन करतां एवा [ते] छात्रोने [पासित्तु] जोइने [भद्दा] भद्रा (भुज्जो) फरीवार (इणमाहु) आ प्रमाणे बोली. २५

व्या०—ते यक्षास्तदा तस्मिन् काले तान् जनांस्तान् ब्राह्मणांस्ताडयंति चपेटादिभिर्घ्नन्ति, कीदृशास्ते यक्षाः?

For Private and Personal Use Only

घोररूपाः, पुनः कीदृशास्ते? अंतरिक्षे आकाशे स्थिताः, पुनः कीदृशास्ते? अत्युग्रा अत्युग्रपरिणामयुक्ताः. उत्प्रेक्ष्यंते-ऽसुरा इवेत्यर्थः. ते हि यस्मिन् यज्ञपाटके ते इति तान् भग्नदेहान् दृष्ट्वा भद्रा भूयः पुनरपि वचनं प्राहुरित्याह ब्रूते, प्राकृतत्वाद्वचनव्यत्ययः. तान् किं कुर्वतः? रुधिरं वमंत इति. ॥ २५ ॥

ते यक्षो ते समये ते जनोने=ब्राह्मणोने थपाट वगेरे महारथी ताडन करे छे. ते यक्षो केवा? घोर=भयंकर रुपाळा, तथा अंतरिक्ष=आकाशमां स्थित तथा अति उग्र=अति उग्र परिणाम युक्त, ( उत्प्रेक्षा करे छे. ) असुर जेवा ते यक्षो, ते यज्ञवाट स्थान में तेओने भग्नदेह=भांगेल छे देहावयव जेना एवा=जोइने भद्रा फरीने पण वचन बोली; ते केवा? रुधिरने वमता. ( प्राकृतमां वचन व्यत्यय थाय छे) २५

गिरिं नहेहिं खणह । अयं दंतेहिं खायह ॥ जायवेयं पाएहिं हणह । जे भिक्खुं अवमन्नह ॥ २६ ॥

(जे) जे तेम [भिक्खुं] आ भिक्षुकनी [अवमन्नह] अवधीरणा करो छो, ते तेम (गिरिं) पर्वतने (नहेहि) नखवडे [खणह] खोदवा जेवुं करो छो [अयं] लोढाने [दंतेहिं] दांतवडे [खायह] चाववा जेवुं करो छो (जायतेअं) अग्निने (पाएहिं) पगवडे [हणह] हणवा जेवुं करो छो. २६

व्या०—अरे वराका इत्यध्याहारः, यूयं नखः कररुहैर्गिरिं पर्वतं खनथ इव, इवशब्दस्य सर्वत्र ग्रहणं कर्तव्यं. पुनर्दंतैरयो लोहं खादथ भक्षयथ इव, पुनर्जातवेदसमग्निं पादैर्हथ इव, अग्निं चरणैः स्पर्शथ इव, ये यूयं भिक्षुं साधुमवमन्यथ, अस्य भिक्षोरपमानं कुरुथ. गिरिलोहाग्नीनामुपमानमनर्थफलहेतुत्वादुक्तं. ॥ २६ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अरे रांकडाओ ! तमे नखवडे गिरि=पर्वतने खोदवा जेवुं करो छो. [सर्व वाक्योमां इव शब्द लेवो.] वळी दांतवडे अयः=लोढाने खाता हो तेवुं करो छो. तेमज जातवेदा=अग्नि पगवडे हणो छो अग्नि पगथी स्पर्शवा जेवुं करो छो. जे तमे आ भिक्षुनुं अवमान करो छो. [गिरि, लोह, अग्नि, त्रणे उपमान अनर्थ फल हेतु कह्यां.] २६

आसीविसो उग्गतवो महेसी । घोरव्वओ घोरपरक्कमो य ॥ अगणिंव पक्खंद पयंगसेणा । जे भिक्खुअं भत्तकाले वहेह

(आसीविसो) शाप आपवामां समर्थ [उग्गतवो] उग्र तपस्वी (महेसी) महा ऋषी छे (घोरव्वओ) घोर व्रतवाळा छे [अ] तथा (घोर-पराक्रमी छे (जे) जे तमे (भत्तकाले) भोजन समये (भिक्खुअं) भिक्षा आपता नथी. उलटा (वहेह) मारो छो (पयंगसेणा व) पतंगीयाना जरथनी जेम (अगणिं) अग्निने (पक्खंद) आक्रमण करो छो. २७

व्या०—भो मूर्खा इति अध्याहारः, एषस्तपस्वी आशीविषः शापदाने समर्थः, आशीविषः सर्प उच्यते, यथा सर्पः पादादिना अवमन्यमानो मारणाय स्यात्, तथा अयमपि शापविषेण मारयति, पुनरयमुग्रतापा महर्षिः, पुनरसौ घोरव्रतः, पुनर्घोरपराक्रमः, ये पुनर्यूयं भक्तकाले भोजनकाले भिक्षुकं पूर्वोक्तलक्षणं मुनिं वध्यथ, यष्ट्यादिभिस्ताडयथ. ते यूयं पतंगसेनाः शलभसमूहा अग्निं प्रस्कंदथ इव, आक्रमथ इव. कोऽर्थः? यथा पतंगसेना अग्निं वधाय प्रविश्यमाना म्रियंते, तथा यूयं मरिष्यथ इत्यर्थः. ॥ २७ ॥

रे मूर्खो! (एटलो अध्याहार छे.) आ तपस्वी आशीविष=शाप देवा समर्थ छे आशीविष सर्प कहेवाय छे. (जेम सर्पने पग वगेरेथी छंछेडे तो मृत्युज करे छे तद्वत् आ पण शापरूपी विषथी मारे एवा छे.) वळी आ उग्र तपाः=उग्रतपवाळा छे, घोर व्रत

For Private and Personal Use Only

तथा घोर पराक्रम छे, तमे जे भोजन काळे पूर्वोक्त लक्षण युक्त आ मुनिने मारो छो=लाकडी वगेरेथी ताडन करो छो ते तमे, पतंगनां टोळां जेम अग्निने आक्रमण करे तेवुं करो छो, [जेम अग्नि उपर पडता पतंगिया मरे छे तेम तमे पण मरशो.] २७

सीसेण एयं सरणं उवेह। समागया सव्वजणेण तुम्भे ॥
जइ इच्छई जीवियं वा धणं वा। लोगंपि एसो कुविओ डहिज्जा ॥ २८ ॥

(तुम्भे) तमे [जइ] जो (जीविअं वा) जीवितने अथवा [धणं वा] धनने [इच्छह] इच्छता हो तो [सव्वजणेण] सर्व जनोनी साथे [समागया] एकत्र थया थका [सीसेण] मस्तक नमावी [एअं] आ महर्षिनुं (सरणं) शरण [उवेह] अंगीकार करो. (एसो) आ महर्षि [कुविओ] कोप पाम्या थका [लोअंपि] आखा जगतने पण (डहेज्जा) बाळी नाखे. २८

व्या०—भो ब्राह्मणाः! तुम्भे इति यूयं सर्वजनेन सर्वकुटुंबेन समागताः संमिलिताः संत एनं तपस्विनं शीर्षेण मस्तकेन शरणं उपेत? शिरःप्रणामपूर्वं सर्वेऽप्यागत्यायमेवास्माकं शरणमित्युक्त्वा अभ्युपागच्छत? यदि यूयं जीवितं वाथवा धनमिहेच्छथ, यत एषः साधुस्तपस्वी कुपितः सन् लोकं समस्तं नगरादिकं दहेत्. ॥ २८ ॥

हे ब्राह्मणो! तमे सर्व जन=सर्व कुटुंबीजनोथी संमिलित थइने आ तपस्वीने मस्तकवडे शरणे प्राप्त थाओ=मस्तकथी प्रणाम करी सर्वे आवीने 'आज अमारुं शरण छे.' एम बोलता समीपे आवो; जो तमे जीवित अथवा धनने इच्छता हो तो; कारण के आ साधु=तपस्वी जो कुपित थाय तो तमाम नगर आदिक लोकने दहे=बाळी नाखे एवा छे. २८

अवहेडियपिट्ठसउत्तमंगे । पसारिया बाहु अकम्मचिट्ठे ॥

निप्भेरियच्छे रुहिरं वमंते। उद्धंमुहे निग्गयजीहनत्ते ॥ २९ ॥
ते पासिआ खंडिअ कट्ठभूए। विमणो विखिन्नो अह माहणो सो ॥
इसिं पसाएइ सभारियाओ। हीलं च निंदं च खमाह भंते ॥ ३०॥

(अवहेडिअपिट्ठसउत्तमंगे) पीठसुधी नमेला मस्तको (पसारिआ बाहुअकम्मचिट्ठे) पहोळा हाथ तथा (निब्भेहितच्छे) फाटी गया छे नेत्रजेमनां (रुहिरं वमंते) रुधिरनुं वमन करे छे तथा (उद्धंमुहे) उंचा मुखवाळा (निग्गयजीहनेत्ते) बहार नीकळेल जीभ तथा आंख जेमना (कट्ठभूए) तथा काष्ट जेवा (ते खंडिअ) ते छात्रोने (पासिआ) जोइने (अह) त्यारपछी (विमणो) व्याकुळ चित्तवाळो थयेलो अने (विसण्णो) विषाद पामेलो (सो माहणो) ते ब्राह्मण (समारिआओ) पोतानी भार्या सहित (इसिं) ऋषिने (पसादेति) प्रसन्न करवा माटे कहेवा लाग्यो के (मंते) हे भगवान् (हीलंच) अवज्ञा करी तथा (निंदच) निंदा करी तेनें (खमाह) तमे क्षमा करो. २९-३०

---

व्या०—अथानंतरं स ब्राह्मण ऋषिं प्रसादयति. कीदृशः स ब्राह्मणः? सभार्यः पत्नीसहितः, सह भार्यया भद्रया वर्तत इति सभार्यः. कथं प्रसादयति? तदाह–हे भदंत पूज्य! हीलामस्मत्कृतमपमानं, च पुनर्निन्दां, अस्माभिर्भवतां निंदा कृता, तां निंदां यूयं क्षमध्वं? कीदृशो ब्राह्मणः? विमना विदूनमनाः, पुनः कीदृशः? विखिन्नो विशेषेण दीनः. किं कृत्वा? तान् खंडिकान् छात्रान् काष्ठभूतान् काष्ठसदृशान्निश्चेष्टितान् दृष्ट्वा, पूनः कीदृशान् तान्? अवहेठितपृष्ठसदुत्तमांगान्, अवहेठितानि पृष्ठयावत् नामितानि, पृष्टिं गत्वा लग्नानि संति शोभनान्युत्तमांगानि मस्तकानि येषां ते

अवहेठितपृष्ठसद्गुत्तमांगास्तान्, पश्चाद्भग्नपृष्ठदेशसंलग्नमस्तकान्. पुनः कीदृशान्? प्रसारितबाहुकर्मचेष्टान्, प्रसारिताः प्रलंबीकृता बाहवो यैस्ते प्रसारितबाहवः, न विद्यते कर्मणि अग्निविषये इंधनघृतादिनिक्षेपणे चेष्टा सामर्थ्यं येषां ते अकर्मचेष्टाः, प्रसारितबाहवश्च ते अकर्मचेष्टाश्च प्रसारितबाहुकर्मचेष्टास्तान्, बाहुप्रसारणत्वेन दूरे पतितें घनदर्वीका-निर्ल्यर्थः. पुनः कीदृशान्? निर्भेरिताक्षान्, निर्भेरितानि प्रसारितानि अक्षीणि यैस्ते निर्भेरिताक्षास्तान्, तरलितनेत्रान्. पुनस्तान् किं कुर्वतः? रुधिरं वमतो मुखाद्रक्तं श्रवतः, पुनः कीदृशान्? ऊर्ध्वमुखानूर्ध्ववदनान्, पुनः कीदृशान्, निर्गतजिह्वानेत्रान् जिह्वा च नेत्रं च जिह्वानेत्रे, निर्गते जिह्वानेत्रे यषां ते निर्गतजिह्वानेत्रास्तान्. ॥२९. ॥ ३० ॥ अथ स ब्राह्मणो हरिकेशऋषिं कीदृशैर्वचनैः प्रसादयति? तानि वचनान्याह—

---

अथ=त्यारपछी, ते ब्राह्मण ऋषिने प्रसन्न करवा बोल्यो. केवो ब्राह्मण? सभार्य=पत्नी सहित; केम प्रसादन करतो? ते कहे छे—'हे भदंत=पूज्य! हीला=अमे करेल अपमान तथा निंदा; अमे जे तमारी निंदा करी ते निंदाने पण तमे क्षमा करो.' ब्राह्मण केवो? विमना=मन जेनुं दूवायेल छे, वळी विखिन्न=विशेषे दीन. केम करीने? ते खंडिक=छात्रोने काष्ठभूत लाकडा जेवा निश्चेष्ट जोइने; फरी केवा? पीठ सूधी नमावेल छे उत्तमांग=मस्तक जेणे तथा प्रसारित भुजवाळा अने कर्मचेष्टा रहित बनेला=अग्निमां इंधनादि नाखवानुं सामर्थ्य जेमां नथी तेवा; वळी प्रसारित छे नेत्र जेनां एवा अने रुधिरनुं वमन करता, उंचा मुखवाळा तेमज जीह्वा तथा नेत्र जेनां नीकळेलां छे तेवा. २९-३०

---

बालेहिं मूढेहिं आयाणएहिं। जं हीलिया तस्स खमाह भंते ॥

महप्पसाया इसिणो हवंति । हु मुणी कोवपरा हवंति ॥ ३१ ॥

[भंते] हे भगवान् (मूढेहिं) मूढ (अयाणएहिं) अज्ञानी [बलेहिं] आ बाळकोए [जं] जे (हीलीआ) तमारी हीलना करी [तस्स] ते (खमाह) क्षमा करो. कारण के (इसिणो) ऋषिओ (महप्पसाया) महा प्रसादवाळा (हवंति) होय छे. (हु) परंतु (मुणी) मुनिओ [कोवपरा] कोपयुक्त [न हवंति] होता नथी. ३१

व्या०—भो पूज्याः! भो भदंताः! एभिर्बालैः शिशुभिर्मूढैः कषायमोहनीयवशगैर्मूर्खैर्हिताहितविवेकविकलैः जं इति यस्मात्कारणात् यूयमवहीलिता अवगणिताः, तस्स इति तस्य अवहीलनस्यापराधं क्षमध्वं? ऋषियो महाप्रसादा भवंति, अतीवनिर्मलचेतसो भवंति. न पुनर्मुनयः कोपपराः क्रोधपरायणा भवंति, मुनयः क्षमावंतो भवंति. ३१ तदा मुनिः किमवादीदित्याह—

हे पूज्य भदंत! कषाय महोहनीयने परवश बनेला तथा पोताना हित अहितना विवेक वगरना आ मूढ बाळकोये तमारी जे हेलना=अवगणना करी तेना अपराधने क्षमा करो. ऋषिओ महाप्रसाद=अत्यंत निर्मल चित्त होय छे, मुनियो क्रोधपरायण थता नथी. किंतु क्षमावारा होय छे. ३१

पुव्विं च इण्हिं च अणागयं च । मणप्पओसो न मे अत्थि कोइ ॥
जक्खा उ वेयावडियं करेंति । तम्हा हु एए निहया कुमारा ॥ ३२ ॥

[पुव्विं च] पहेलां [इण्हिं च) तथा हमणा (अणागयं च) भविष्यमां (मे) मारे [कोइ] कांइपण (मणप्पओसो) मननो प्रद्वेष षमनो

उपर [न अत्थिी] नथी (हु) जे कारण माटे (जक्खा) यक्षो [वेआवडिअं] अमारी वैयावृत्य [करेंति] करे छे (तम्हा हु] ते कारणथी (एए) आ (कुमारा) छात्रो [निहया] हणाया छे. ३२

व्या०—भो ब्राह्मणाः! मे मम पूर्वमतीतकाले च पुनरपि इदानीं वर्तमाने काले, च पुनरनागते आगामिनि काले मनःप्रद्वेषो नास्ति, अतीतकाले नासीत्, इदानीं प्रद्वेषो नास्ति, अग्रेऽपि न भविष्यतीत्यर्थः. कोऽप्यल्पोऽपि नास्ति, हु पुनरर्थे, येन यक्षा वैयावृत्त्यं साधुतर्जकनिवारणां साधुभक्तिं कुर्वंति, तस्मात् हु इति निश्चयेन एते कुमार, यक्षैर्निहताः. ॥३२॥ अथ सर्वे उपाध्यायादयस्तद्गुणाकृष्टचित्ता एवमाहुः—

हे ब्राह्मणो! मने पूर्वे=भूतकाळमां, तेम हमणां के अनागत=भविष्यकाळमां मनःप्रद्वेष नथी. अर्थात् अतीत काळमां हतो नहिं, वर्त्तमानकाळमां प्रद्वेष छे नहिं तेम आगळ पण थशे नहिं. कोइ पण=अल्प पण नथी. ('हु' पुनः शब्दना अर्थमां छे.) जे आ यक्षो वैयावृत्य=साधुने तरछोडनाराओनुं निवारण करी साधुभक्ति=करे छे तेथी आ कुमारो यक्षोये हणाया छे. ३२

ते पछी उपाध्यायादि तेना गुणोथी आकर्षाय आम बोल्या.

अत्थं च धम्मं च वियाणमाणा । तुब्भे नवि कुप्पह भूइपन्ना ॥
तुब्भं तु पाए सरणं उवेमो । समागया सव्वजणेण अम्हे ॥ ३३ ॥

(अत्थं च) शास्त्रोना अर्थने [विआणमाणा] जाणनारा (भूति प्रज्ञावाळा (तुब्भे) तमे [ण वि कुप्पह] कदी पण कोप नज पामो. [सव्वजणेण] सर्व परिवार साथे [समागमा] एकत्र थइने आवेला (अम्हे) अमे (तुब्भं तु) तमाराज [पाए] पादने [सरणं] शरणरूप

(उवेमो) अंगीकार करीए छीए. ३३

व्या०—हे स्वामिनः! यूयमपि निश्चयेन न कुप्यथ, कोपं न कुरुथ. कथंभूता यूयं? अर्थं सर्वशास्त्राणां तत्त्वं, च पुनर्धर्मं वस्तूनां स्वभावं, अथवा धर्मं दशविधं साध्वाचारं विजानानाः, अर्थधर्मज्ञा इत्यर्थः, पुनः कथंभूता यूयं? भूतिः सर्वजीवरक्षा तत्र प्रज्ञा येषां ते भूतिप्रज्ञाः, तस्माद्वयं तुभ्यं इति युष्माकं चरणयोः शरणमुपेम उपागताः स्म. अम्हे शब्देन वयमिति ज्ञेयं, कीदृशा वयं? सर्वजनेन समागताः सर्वकुटुंबपरिवारेण समागता मिलिताः. ॥ ३३ ॥

हे स्वामी! तमे निश्चये नज कोप करो. केवा तमे? अर्थ=सर्व शास्त्रोना तत्त्वने तथा धर्म=वस्तुस्वभावने; अथवा धर्म एटले दशविध साधुओना आचारने विशेषे जाणनारा, तथा भूति=सर्व जीव रक्षा, तेमां जेनी प्रज्ञा बुद्धि वर्त्ते छे तेवा छो ते कारण माटे सर्व जन=कुटुंब परिवार सहित अत्रे मळेला अमे तमारा चरणने शरणे आव्या छइए. ३३

अच्चेमु ते महाभाग । न ते किंचि न अच्चिमो ॥ भुंजाहि सालिमं कूरं । नाणावंजणसंजुयं ॥ ३४ ॥

(महाभाग) हे महाभाग! [ते] तमारी (अच्चेमु) अमे पूजा करीए छीए (ते) तमारी [किंचि] पादनी रज पण [न अच्चिमो] अमे नहिं पूजीए एम (न) नहीं [नाणावंजण संजुअं] दहींथी युक्त एवा (सालिचं) शालिमय [कूरं] ओदनने [भुंजाहि] अहींथी ग्रहण करी तमे जमो. ३४

व्या०—हे महा भाग! ते तव सर्वमप्यर्चयामः, ते तव सर्वमपि श्लाघयामः, न ते तव किमपि चरणधूल्यादिकमपि यद्वयं नार्चयामः, के वयं ये त्वां नार्चयामः; त्वं तु देवानां पूजार्हः, वयं तव कां पूजां कुर्मः? एतादृशी का

पूजास्ति? या तव योग्या, परंतु वयं दासभावं कुर्म इत्यर्थः. 'सालिमं' इति शालिमयं सम्यग्जातिशुद्धं शालिनिष्पन्नं कूरं तंडुलभोज्य भुंजाहि भुंक्ष्व? कथंभूतं कूरं? नानाव्यंजनसंयुतं, बहुविधैर्व्यंजनैर्दध्यादिभिः सहितं. ॥ ३४ ॥

---

हे महाभाग! तमारा सर्वनुं अमे अर्चन करोये छइये; अर्थात् तमारा सकळ पदार्थने अमे वखाणीये छइए. तमारुं कंइ पण एवुं नथी के जे अमे नपूजीए तमारा चरणनी रज पण अमे अर्चीये छइए. तमे तो देवोये पूजवा योग्य छो. एवी कोइ तमारे योग्य पूजा नथी परंतु दास भावे कहीये छीये के—बहु प्रकारना दहीं वगेरे त्यां जनोथी मुक्त सारी जातना शाळना चोखानो कूर=भात (तंदुल भोज्य) भोजन करो. ३४

---

इमं च[1] मे[3] अत्थि[5] पभूयं[4] अन्नं। तं[6] भुंजसु अम्हं अणुग्गहट्ठा[8] ॥ बाढं[10] से पडिच्छइ[16] भत्तपाणं[15] । मासस्स[12] उ पारणए[14] महप्पा[11] ॥ ३५

(च) वळी [इमं] आ देखातुं [मे] मारुं (पभूअं अन्नं) पुष्कळ अन्न [अत्थि] छे, (तं) ते [अम्हं] अमारा (अणुग्गहट्ठा) अनुग्रहने माटे (भुंजसु) आप ग्रहो त्यारे (बाढं) बहु सारुं (ति) ए प्रमाणे बोलता (महप्पा) ते महात्माए (मासस्स उ) माण खमणनाज [पारणाए] पारणाने विषे [भत्तपाणं] भात पाणी (पडिच्छइ) ग्रहण कर्या. ३५

---

व्या०—हे स्वामिन्! मे मम इदं प्रत्यक्षं खंडमंडकादिकं अन्नं प्रभूतं वर्तते, प्रचुरं वर्तते, पूर्वमपि शालिमयं कूरग्रहणं कृतं, अत्र च पुनरन्नग्रहणं तत्सर्वान्नप्राधान्यख्यापनार्थं तद्भोज्यं भुंक्ष्वास्माकमनुग्रहार्थं लाभार्थं, इतिब्राह्मणैः प्रोक्ते सति मुनिः प्राहबाढं इत्युक्त्वा, तथास्तु, बाढंशब्दोंगीकारे, एवमेव करोमि. गृहीष्यामीत्युक्त्वा साधुर्मासस्य पारणके भक्तपानमाहारपानीयं प्रतीच्छत्यंगीकरोति. कथंभूतः स मुनिः? महात्मा, महान् निर्मलो निःकषाय आत्मा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





यस्य स महात्मा महापुरुषः. ॥ ३५ ॥

हे स्वामिन्! मारुं आ=प्रत्यक्ष सामुं पडेलुं खंडमंडकादिक पुष्कळ अन्न हाजर छे. पूर्वे पण शाळना चोखानो कूर=भात स्वीकार्यो, वळी अहीं पण फरी 'अन्न' पदनुं ग्रहण सर्व अन्ननुं ख्यापन करवा माटे करेल छे. ते भोज्य पदार्थो अमारो अनुग्रह करवा जमो. आम ब्राह्मणोये कह्युं त्यारे मुनि बोल्या—बाढं=तथा स्तु, [बाढंशब्द अंगीकार अर्थमां छे] 'एमज करुं छुं.' 'ग्रहण करीश' आम बोलीने साधुए एक मासना पारण विधानमां आहार तथा पाणी अंगीकार कर्यां मुनि केवा? महात्मा=महान्=निर्मळ कषाय रहित छे आत्मा जेनो=अर्थात् महापुरुष. ३५

तहिं[1] य[2] गंधोदयपुप्फ[4]वासं। दिव्वा[5] तहिं[6] वसुहारा[7] य[8] वुट्ठा[9] ॥ पहाया[12] उ दुंदुहिओ[11] सुरेहिं[3]। आगासे अहो[14] दाणं[13] च[12] घुट्ठं[15] ॥३६॥

[तहिअ] ते यज्ञपाठकने विषे [अगासे] आकाशमां रहेला [सुरेहिं] देवोए [गंधोदयपुप्फवासं] गंधोदक पुष्प वृष्टि करी [य] तथा (तहिं) त्यां (दिव्वा) दीव्य [वसुहारा] वसुधारा (वुट्ठा) वरसावी तथा [दुंदुहीओ] देवदूंदुभिओ (पहयाओ) वगड्या (च) तथा [अहो दाणं] अहो दान ए प्रमाणे [घुट्ठं] घोषणा करी. ३६

व्या०—तहिं तस्मिन् यज्ञपाटके मुनिना आहारे गृहीते सति गंधोदकपुष्पवर्षमभूदिति शेषः, सुगंधपानीयकुसुमवर्षा आसन इत्यर्थः. च पुनस्तस्मिन् स्थाने दिव्या प्रधाना देवैः कृता वसुधारा वृष्टा, स्वर्णदीनाराणां वृष्टिरभूत्. वसु द्रव्यं तस्य धारा सततपातजनिता वसुधारा, सा वृष्टा देवैः पातिता इत्यर्थः. तु पुनराकाशे सुरैर्दुंदुभयः प्रहताः, देवैराकाशे वादित्राणि वादितानी, च पुनराकाशे अहोदानमहोदानमिति घुष्टं देवैः शब्दितं. ॥ ३६ ॥ तदा च द्विजा

For Private and Personal Use Only

विस्मिताः किमाहुस्तदाह—

त्यां यज्ञवाट प्रदेशमां-मुनिये आहार लीधो त्यारे गंधोदक=सुगंधयुक्त जळ तथा सुगंधी पुष्पोनी वर्षा थइ; वळी ते स्थाने दिव्य एटले प्रधान देवताओए करेली वसुधारा=सुवर्णादिद्रव्यनी धारा=वर्षी, अविच्छिन्न सुवर्ण धारा वर्षवा लागी तथा आकाशमां देवोए दुंदुभिओ प्रहताः=वगाड्या, देवोए आकाशमां वादित्र वगाडवा मांड्या, अने आकाशमां 'अहो दानं' 'अहो दानं' एवा शब्दोनी देवोए घोषणा करी. ३६ त्यारे विस्मय पामेला द्विज शुं बोल्या ते कहे छे.

सक्खं खु दीसइ तवोविसेसो । न दीसइ जइविसेसो कोइं ॥ सोवागपुत्तं हरिएससाहुं । जस्सेरिसा इड्ढि महाणुभागा ३७

(तवोविसेसो) तपनुं विशेष=महात्म्य (सक्खं खु) साक्षात् देखाय छे (कोइ) कांइ पण [जाइ विसेसु] जातिनुं विशेषपणुं (न दीसई) देखातुं नथी. (सोवागपुत्तं) आ चांडाळपुत्र (हरिएससाहुं) हरिकेश साधुने जुओ (जस्स) जेनी (एरिसा) आवो (महाणुभागा) मोटा भाग्यवाळी (इड्ढि) समृद्धि छे. ३७

व्या०—खु इति निश्चयेन तपोविशेषः साक्षाद् दृश्यते, जातिविशेषः कोऽपि न दृश्यते, तपोमाहात्म्यं दृश्यते. जातिमाहात्म्यं किमपि न दृश्यते. श्वपाकपुत्रं चांडालपुत्रं तं हरिकेशसाधुं पश्यत इति शेषः. तमिति कं? यस्य हरिकेशस्य साधोरेतादृशी सर्वजनप्रसिद्धा ऋद्धिर्वर्तते, देवसाहाय्यरूपा संपद्वर्तते, कीदृशी ऋद्धिः? महानुभागा महाननुभागोऽतिशयो यस्याः सा महानुभागा, महामाहात्म्यसहिता इत्यर्थः. ॥ ३७ ॥ अथ मुनिस्तान् ब्राह्मणानुपशांतमिथ्यात्वान् दृष्ट्वा धर्मोपदेशमाह—

'खु' निश्चये=तपो विशेष साक्षात् देखाय छे; जाति विशेष कोइ पण नथी दीसतो. तपोमाहात्म्य देखाय छे, जातिमाहात्म्य कंइ पण देखातुं नथी. आ चांडाल पुत्र हरिकेश साधुने='जुओ' [एटलुं शेष उमेरवानुं छे.] ते कोण? हरिकेश साधुनी आवी सर्व जन प्रसिद्ध ऋद्धि=देव सहायरूपा संपत्ति केवी ऋद्धि? महानुभागा=महोटा माहात्म्य सहित छे. ३७

मुनि तेओने उपशांत मिथ्यात्व जाणीने धर्मोपदेश कहे छे.

किं माहणा जोइसमारभंता । उदएण सोहिं बहियां विमग्गह ॥
जं मग्गहा बाहिरियं विसोहिं । न तं सुदिट्ठं कुसला वयंति ॥ ३८ ॥

[माहणा] ब्राह्मणो ! [जाइंस आरंभता] अग्निनो आरंभ करता सता (उदएण) जळवडे (बहिआ) बहारनी [सोहिं] शुद्धिने तमे (किं) केम (विमग्गह) शोधो छो? कारण के (जं) जे (बाहिरिअं) बहारनी (विसोहिं) विशुद्धने (मग्गहा) तमे शोधो छो [तं] तेने (कुसला) पंडित पुरुषो (सुदिट्ठं) सारुं जोयेलुं (न वयंति) कहेता नथी. ३८

व्या०—किमितिशब्दोऽधिक्षेपे. भो ब्राह्मणा यूयं शृणुत? ज्योतिरग्निं समारभंत., अग्नीनां समारंभं कुर्वंतः किं ब्राह्मणा भवंति? अपि तु न भवंति. भो ब्राह्मणाः! उदकेन शोधिं कुर्वतो बाह्यां शुद्धिं विमार्गयथ जानीथ. यागं कुर्वतः स्नानं कुर्वतश्च ब्राह्मणा न भवंतीत्यर्थः. यां यागस्नानादिकां बाह्यां विशुद्धिं विमार्गयथ विचारयथ, तां बाह्यां विशुद्धिं कुशला ज्ञानतत्वाः सुदृष्टं सम्यग्दृष्टं न वदंति, यत् यज्ञादावग्नीनां तेजस्कायस्थजीवानां विराधना, अथ च स्नानादौ अप्कायस्थजीवानां विराधना विशुध्ध्यर्थं विधीयते तत्सर्वज्ञैर्न सम्यग्दृष्टं, सम्यग् न कथितमित्यर्थः. यदुक्तं-स्नानं मनो

मलत्यागो । यागश्चेंद्रियरोधनं ॥ अभेददर्शनं ज्ञानं । ध्यानं निर्विषयं मनः. ॥ १ ॥ इति ॥ ३८ ॥

('किम् इति' शब्द अधिक्षेप अर्थमां छे.) हे ब्राह्मणो ! तमे सांभळो; ज्योतिः=अग्निना समारंभ करनारा शुं ब्राह्मणो थाय छे? नहिं. उदक वडे शुद्धि करता बाह्य शुद्धि जाणो छो=याग अथवा स्नान करवाथी ब्राह्मण नथी थवातुं. जे याग स्नानादिक बाह्य शुद्धिने गोतता फरो छो ते बाह्य शुद्धिने कुशल=पंडित पुरुषो सुदृष्ट=सम्यक्दृष्ट नथी कहेता. जे अग्निमां तेजःकायस्थ जीवोनी विराधना तथा स्नानादिकमां अप्कायस्थ जीवोनी विराधना कराय ते तत्त्वज्ञ जनो सारुं नथी कहेता. कह्युं छे के—'मनोमलनो त्याग ए स्नान छे; इन्द्रियोनो निरोध कराय ते याग छे, अभेद दर्शन एज ज्ञान अने मनने निर्विषय कराय एज खरुं ध्यान छे.'

कुसं च जूवं तणकट्ठमग्गिं । सायं च पायं उदयं फुसंता ॥ पाणाइं भूयाइं विहेडयंता । भुज्जोवि मंदा पकरेह पावं ३९

[कुसं च] कुश=दर्भ तथा (जूवं) यज्ञस्तंभ (तणकट्ठं) तृण तथा (अग्गिं) अग्नि वळी (सायं च) सायंकाळे अने [भूआइं] वनस्पतिकायने (विहेडयंता) विविध प्रकारे पीडा करता तमे ब्राह्मणो (भुज्जो वि) फरीने पण (मंदा) मंद (पावं) पापकर्मने [पकरेह] करो छो. ३९

व्या०—भो ब्राह्मणाः! मंदा यूयं भूयोऽपि पुनरपि शुद्धिकरणप्रस्तावेऽपि पापं प्रकुरुथ. पूर्वमपि संसारकार्यकरणप्रस्तावे आरंभं कृत्वा प्राणान् भूतानि विनाश्य पातकमुपार्जितं, पुनर्धर्मकरणप्रस्तावे तदेव क्रियते इत्यर्थः. किं कुर्वंतः? कुशं दर्भं, यूपं यज्ञस्तंभं, तृणं वीरणादिनडादिकं, काष्टं शमीवृक्षस्येंधनं, अग्निं च एतत्सर्वं प्रतिगृह्णन्तः, एतत्सायं संध्याकाले, च पुनः प्रातः प्रभाते उदकं पानीयं स्पृशंत आचमनं कुर्वंतः, अत एव प्राणान् द्वींद्रियत्रींद्रियचतुरिन्द्रि-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





यान् भूतान, असून् पृथिव्यादीनपि तदाधारभूतान् विहेडयंतो विशेषेण हिंसंत इत्यर्थः. एतेषामेव प्राणभूतसत्त्वानां विराधनेन हिंसा भवति. पुनरेतेषामेव शुद्धिकरणकालेऽपि विराधना विधीयते, कुतोऽस्माकं शुद्धिर्भवित्री? इति न जानंति, अत एव मंदा मूर्खाः, यत उक्तं—दृष्टिपूर्वं चरेन्मार्गं । वस्त्रपूतं पिबेज्जलं ॥ ज्ञानपूतं सृजेद्धर्मं । सत्यपूतं वदेद्वचः ॥ १ ॥ ३९ ॥ अथ प्रत्युत्पन्नशंकास्ते ब्राह्मणा धर्मं पप्रच्छुः—

हे ब्राह्मणो! मंद एवा तमे फरीने पण शुद्धि करवामां पाप करो छो. पूर्वे पण संसार कार्य करतां आरंभमांज प्राण तथा भूतोनो विनाश करी पातक कर्युं पाछुं धर्म करवाना प्रसंगे पण एज कराय छे. शुं करीने? कुश=दर्भ; यूप=यज्ञस्तंभ, तृण=वीरण खड आदिक, काष्ठ=शमी वृक्षनी समिध तथा अग्नि; आ सघळुं लइने सायं=संध्याकाळे तेमज प्रातः=प्रभाते उदक=जलनो स्पर्श=आचमन वगेरे करता, प्राण=द्वींद्रिय, त्रींद्रिय तथा चतुरिंद्रिय भूत प्राण तथा तेना आधाररूप पृथिव्यादिकने पण विशेषे करी हिंसता; [ए प्राणभूत सत्वोनी विराधनाथी हिंसा थाय छे.] वळी एओनी शुद्धि करती वेळाये पण विराधना कराय छे, 'अमारी शुद्धि केम थशे' ए तेओ नथी जाणता तेथी मंद=मूर्ख कह्या. कह्युं छे के—मार्गमां चालतां आगळ दृष्टिथी प्रदेश जोइने पगलुं भरवुं; जळ वस्त्रथी गाळीने पीवुं; ज्ञानथी पवित्र जाणीने धर्म करवो तथा सत्यथी पवित्र वचन बोलवुं. ३९

पछी ब्राह्मणोने शंका थतां धर्म पूछवा लाग्या—

कह चरे भिक्खु वयं यजामो । पावाइं कम्माइं पणुल्लयामो ॥
अक्खाहि णो संजय जक्खपूइया । कहं सुजुट्ठं कुसला वयंति ॥ ४० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





(भिक्खु) भिक्षु [वयं] अमे [कहं] केवीरीते (चरे) यज्ञ माटे प्रवर्तीए (यजामो) के जेना वडे (पावाइं) अशुभ एवां [कम्माइं] कर्मोने (पणोल्लयामो) दूर करीए (संजय) हे संयत [जक्खपूइआ] हे यक्षोवडे पूजित (णो) अमने [अक्खाहि] तमे कहो, [कुसला] तत्त्वज्ञानीओ (कहं) कोने (सुइट्ठं) सारो यज्ञ (वयंति) कहे छे. ४०

व्या०—हे भिक्षो! वयं कथं चरेमहि? कस्यां क्रियायां प्रवर्तेमहि? हे भिक्षो! पुनर्वय कथं यजामो यागं कुर्मः? पुनर्वयं पापानि पापहेतूनि कर्माणि कथं प्रणुल्लयामः प्रणुदामः प्रकर्षेण स्फेटयामः? हे यक्षपूजित! हे संयत! जितेंद्रिय! कुशला धर्ममर्मज्ञा विद्वांसः कथं केन प्रकारेण सुइट्ठं इति सुष्टु शोभनं इष्टं स्विष्टं शोभनयजनं वदंति? तत् शोभनयज्ञं नोऽस्मान् आख्याहि? कथय? इत्यर्थः. ॥ ४० ॥ अथ मुनिराह—

हे भिक्षो! अमे कइ क्रियामां प्रवर्तीए? तेम अमे केवी रीते याग करीये? तथा अगे अमारा पाप कर्मोने केवी रीते तद्दन फेडी दइये? हे यक्षपूजित! संयत=जितेंद्रिय! कुशल=धर्मने जाणनारा विद्वान् जनो कया प्रकारे करेलाने सारुं यजन=शोभनयाग कहे छे ते शोभन यक्ष अमने कहो. ४०

छज्जीवकाये असमारंभंता। मोसं अदत्तं च असेवमाणा॥ परिग्गहं इत्थिओ माणमायं। एयं परिन्नाय चरंति दंता॥४१

[छज्जीवकाए] छकायनो (असमारंभता) आरंभ नहिं करता तथा [मोसं] मृषावादने [च] अने [अदत्तं] अदत्तादानने (असेवमाणा) नहिं सेवता तथा (परिग्गहं) परिग्रह (इत्थिओ) स्त्रीओ [माण] मान अने (मायं) माया (एअं) ए सर्वे [परिन्नाय] ज्ञपरिज्ञावडे करीने [दंता] दांत=दमनारा (चरंति) प्रवर्ते छे ४१

व्या०—पूर्वं ब्राह्मणैरयं प्रश्नो विहितः, कथं वयं प्रवर्तेमहि? तस्योत्तरं–भो ब्राह्मणाः! दांता जितेंद्रिया एतत्पूर्वोक्तं पापहेतुकं परिज्ञाय चरंति प्रवर्तंते. साधवो ज्ञपरिज्ञया ज्ञात्वा प्रत्याख्यानपरिज्ञया आरंभान्निवर्तंते इति भावः. दांताः किं कुर्वाणाः? षड्जीवकायान् असमारंभमाणा अनुपमर्दयंतः, पुनर्मृषावादं च पुनरदत्तं असेवमानाः, पुनः परिग्रहं उपकरणमूर्छां, सचित्ताचित्तद्रव्यग्रहणरक्षणात्मकं, पुनः स्त्रीं, तु पुनर्मानमभिमानं, पुनर्मायां परवंचनात्मिकां असेवमानाः, मानमाययोः सहकारित्वेन क्रोधलोभयोरपि त्यागो ज्ञेयः. एतान् सर्वान् पापहेतून् ज्ञात्वा, पुनस्त्यक्त्वा साधवो यतनया चरंति, अतो भवद्भिरपि एवं चरितव्यमित्यर्थः. ॥४१॥ अथ द्वितीयप्रश्नस्य कथं यजाम इत्यस्य उत्तरमाह—

पूर्वे ब्राह्मणोये आ प्रश्न कर्यो हतो के अमे केम वर्तीए? तेनुं उत्तर–हे ब्राह्मणो! दांत=जितेंद्रिय पुरुषो, आ पूर्वोक्त पाप हेतु जाणीने प्रवर्त्ते छे. साधुओ ज्ञपरिज्ञा वडे जाणी प्रत्याख्यान परिज्ञावडे आरंभथी निवृत्त थाय छे. ए दांत केम करीने विचरे छे? छ जीवकायने उपमर्द न करता, वळी मृषावाद तथा अदत्तने न सेवनारा अने परिग्रह=सचित्त अचित्त आदि द्रव्योनुं ग्रहण तथा रक्षणरूप उपकरण मूर्छा=तथा स्त्रीयो, अभिमान, परवंचन रूप माया; इत्यादिकने नहिं सेवता,–अहीं मान तथा मायाना सहकारी क्रोध तथा लोभनो पण त्याग जाणी लेवो–ए सर्व पाप हेतुओने जाणीने तेमज जाण्या पछी त्यजीने साधुओ यतनापूर्वक विचरे छे माटे तमारे पण एवी रीते वर्त्तवुं. ४१ हवे 'केम यजन करीये'? ए बीजा प्रश्ननुं उत्तर कहे छे.

सुसंबुडा पंचहिं संवरेहिं । इह जीवियं अणवकंखमाणा ॥ वोसट्ठकाया सुइ चत्तदेहा । महाजयं जयइ जन्नसिट्ठं॥४२॥

[पंचहिं] पांच (संवरेहिं) संवरवडे [सुसंबुडा] सारी रीते संवृत तथा [इह] आ भवने विषे [जीविअं] जीवितने (अणवकंखमाणा)

नहिं इच्छता [वोसट्ठकाया] परीषहो तजी दीधा छे तथा [सुइचत्तदेहा] शुचि रहित त्यक्त देह [महाजयं] मोटा पराभव छे जेमां एवा [जन्नसिट्ठं] श्रेष्ठ यज्ञने [जयइ] यजे छे. ४२

व्या०—भो ब्राह्मणाः! पंचभिः संवरैर्हिंसामृषाऽदत्तमैथुनपरिग्रहविरमणैः सुसंवृताः सुनरामतिशयेन संवृता आच्छादिताश्रवा निरुद्धपापागमनद्वाराः सुसंवृताः संयमिनः जन्नसिट्ठं यज्ञश्रेष्ठं यजंति कुर्वंतीत्यर्थः. यज्ञेषु श्रेष्ठो यज्ञश्रेष्ठस्तं, अथवा श्रेष्ठो यज्ञः श्रेष्ठयज्ञस्तं, प्राकृतत्वात् यज्ञश्रेष्ठमिति ज्ञेयं. कीदृशं श्रेष्ठयज्ञं? महाजयं महान् जयः कर्मारीणां विनाशो यस्मिन् स महाजयस्तं. कीदृशाः सुसंवृताः? इहास्मिन् मनुष्यजन्मनि जीवितं, प्रस्तावादसंयमजीवितव्यं अनवकांक्षमाणाः, असंयममनीप्संत इत्यर्थः. पुनः कीदृशाः सुसंवृताः? व्युत्सृष्टदेहाः, विशेषेण परीषहोपसर्गसहने उत्कृष्टः कल्पितः कायो यैस्ते व्युत्कृष्टदेहाः. पुनः कीदृशाः? शुचयो निर्मलव्रताः, पुनः कीदृशाः? त्यक्तदेहाः, त्यक्तो निर्ममत्वेन परिचर्याभावेन अवगणितो देहो यैस्ते त्यक्तदेहाः, एतादृशाः साधवः स्विष्टं यज्ञं कुर्वंति एष एव कर्मप्रस्फेटनोपाय इत्युक्तं. ततो भवंतोऽप्येवं यजंतामिति भावः. ॥ ४२ ॥ यजमानस्य कान्युपकरणानीति पुनर्ब्राह्मणाः पृच्छंतिस्म—

हे ब्राह्मणो! पांच संवर–हिंसा, मृषा, अदत्त, मैथुन तथा परिग्रह; आ पांचथी विराम पामवारूप संवर पंचमहाव्रतवडे सम्यक्प्रकारे संवृत=आश्रयद्वारने बंध राखता संयमी पुरुषो यज्ञश्रेष्ठ=यज्ञोमां श्रेष्ठ यज्ञ करे छे, [प्राकृतमां पूर्वनिपात थतां यज्ञ श्रेष्ठ पद थइ शके] केवो यज्ञ श्रेष्ठ? महाजय, एटले कर्मरूप अरिनो जेमां विनाश थाय तेवा महोटा जयने पामे छे. वळी ते केवा? आ मनुष्य

जन्ममां जीवित=प्रसंगमां साधारण जीवित न किंतु असंवृत जीवितनी आकांक्षा न राखनारा=असंयम दशाने नहिं इच्छनारा, तेमज व्युत्सृष्ट देह=विशेषतः परीषह उपद्रवादिक सहन करवामांज जेणे देह समर्पण करेल छे एवा तथा शुचि=निर्मळाचरणी अने त्यक्त देह, अर्थात् ममता छुटी जवाथी परिचर्या न करतां देहनी अवगणना करनारा, आवा साधुओ सम्यक्प्रकारे इष्ट यज्ञ करे छे. कर्मोने फेडवानो एज उपाय कहेलो छे, तेथी तमे पण एज प्रकारे यजन करो. ४२

यजमानमां उपकरणो क्या? ए ब्राह्मणोनो प्रश्न कहे छे.

के ते जोई के च ते जोइठाणं । का ते सुया किं च ते कारिसंगं ।
एहा य ते कयरा संति भिक्खू । कयरेण होमेण हुणासि जोइ ॥ ४३ ॥

तमारुं ज्योति: क्युं? पुनः ते ज्योतिः स्थान क्युं? तमारी स्रुचा कयी? तथा तमारां=अडायां क्यां? तथा तमारा एधा=काष्ठ क्यां? हे भिक्षो क्या होमवडे करी तमे ज्योति=अग्निमां होम करो छो? ४३

मूल गाथा ४३थी ४७ सुधी गाथानो मूलार्थ संक्षेपथीज आपेल छे कारण के टीकामां संपूर्ण अर्थ छे.

व्या०—हे मुने! ते तव किं ज्योतिः? कोऽग्निः? च पुनस्ते तव किं ज्योतिःस्थानमग्निस्थानं? अग्निकुंड किमस्ति? ते तव काः पुनः शुचो घृतादिप्रक्षेपका दर्व्यः? च पुनस्ते तव करीषांगं अग्न्युद्दीपनकारणं किमस्ति? विध्याप्यमानोऽग्निर्येनोद्दीप्यते संधुक्ष्यते तत्करीषांगं तव किं विद्यते? च पुनरेधाः कतराः काः समिधः? याभिरग्निः प्रज्वाल्यते ताः काः संति? च पुनः शांतिर्दुरितोपशमहेतुरध्ययनपद्धतिस्तव कतरा कास्ति? हे भिक्षो! त्वं कतरेणेति केन होमेन हव-

अथ विविधभंग्या भोजितस्य कुमारस्य एवमुक्तं राज्ञा, कुमार! तव भक्तिरस्मादृशैः कापि कर्तुं न पार्यते. परमियमेवास्माकं भक्तिः, यदियं कन्या तव प्राभृतीकृता, सुमुहूर्ते तयोर्विवाहो जातः, कुमारस्तया समं विलासं कुर्वन् सुखेन तत्र तिष्ठति. अन्यदा कुमारेण तस्याः प्रियायाः पृष्टं. किमर्थमेकाकिने मह्यं त्वं नृपेण दत्ता? सेवाच आर्यपुत्र! एष मदीयः पिता बलवत्तरवैरिसंतापित इमां विषमपल्लिं समाश्रितः. अत्र तातपत्न्याः श्रीमत्याश्चतुर्णां पुत्राणामुपर्यहं पुत्री जाता, अहमतीव पितुर्वल्लभा, यौवनवस्था अन्यदा पित्रा उक्ता, पुत्रि! मम सर्वेऽपि राजानो विरुद्धाः

संति, तेन त्वमिह स्थितैव योग्यं वरं गवेषय? ततोऽहं ग्रामाद्बहिस्तस्य सरसस्तीरे समायातान् पथिकान् विलोकयंती स्थिता. तदानीं त्वं तत्रायातो मया भाग्यात् प्राप्तश्चेति परमार्थः.

विविध प्रकारनां भोजन जमाडी राजाए कुमारने कह्युं के-'अमारा जेवा आपनी कंइ पण भक्ति शुं करी शके? पण अमारी तो एज भक्ति छे के आ कन्या आपने उपायन करीए छीए. सारुं मुहूर्त्त जोइ बेयनो विवाह थयो. हवे ए कन्यानी साथे कुमार विलास करता सुखे त्यां रह्या. एक समये कुमारे ते कन्याने पूछ्युं के-'राजाए मने एकलाने झट लइने केम तने आपी दीधी? ते कन्या बोली के-'हे आर्यपुत्र! आ मारा पिताने अधिक बळवाळा शत्रुओए संतापवाथी आ विषमपल्ली=भिल्लना गाम=मां आवी रह्या छे, अहीं मारी मा श्रीमतीने चार पुत्रोनी उपर हुं एक पुत्री थइ. हुं मारा बापनी अति व्हाली पुत्री छुं. मने युवावस्थावाळी जाणी एकवार पिताए कह्युं के-'हे पुत्री! मारा सर्वे राजाओ विरोधी छे तेथी तुं अहीं रहीनेज योग्य वर गोती लेजे. ते पछी हुं गामनी बहार तळावने कांठे आवता पथिकजनोने जोया करुं छुं तेमां तमे त्यां आव्या अने मारा सद्भाग्यथी मने प्राप्त थया; आ सघळी खरी हकीकत छे.

ततस्तया श्रीकांतया समं विषय सुखमनुभवतस्तस्य सुखेन वासरा यांति. अन्यदा स पल्लीपतिस्तेन कुमारेण समं निजसैन्यवेष्टितः स्वविरोधिनृपदेशभंगाय चलितः. मार्गे गच्छतस्तस्य क्वाचित्सरस्तीरे वरधनुर्मिलितः. कुमारेणोपलक्षितः. कुमारं दृष्ट्वा स रोदितुं प्रवृत्तः, कुमारेण बहुप्रकारं वारितः स्थितः. कुमारेण पृष्टं मत्तो दूरीभूतेन त्वया किमनुभूतं? वरधनुः प्राह कुमार! तदानीं त्वां वटाध उपवेश्याहं जलार्थं गतः, सर एकं च दृष्टवान्. ततो जलं गृहीत्वा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तवांतिके यावदहमागंतुं प्रवृत्तस्तावत्सन्नद्धबद्धकवचैर्दीर्घनृपभटैः सहसा मिलितैरहमुपलक्षितस्ताडितश्च,उक्तं च क ब्रह्मदत्त इति. मयोक्तमहं न जानामि. ततो दृढतरं ताडितोऽहमवदं ब्रह्मदत्तो व्याघ्रेण भक्षितः. तैरुक्तं तं देशं दर्शय? तैर्मार्यमाणोऽहं तवांतिकदेशमागत्य तदानीं तां संज्ञामकार्षं. त्वयि ततो नष्टेऽहं पुनस्तैर्भृशं ताड्यामानः स्वमुखे परिव्राजकदत्तां गुटिकां क्षिप्तवान्. तत्प्रभावादहं निश्चेष्टो जातः. ततस्ते मृतोऽयमिति ज्ञात्वा सर्वेऽपि भटा गताः.

त्यारपछी ए श्रीकांता नामनी राजकन्या साथे विषयसुखोने अनुभवतां कुमारना दिवसो सुखे वीतता हता. एक वखते ए पल्लीपति पोताना सैन्यने लइ पोताना विरोधी राजाना देशनो भंग करवा चाल्यो ते साथे ब्रह्मदत्तकुमार पण चाल्या. मार्गमां चालतां एक सरोवरने तीरे वरधनु मल्यो तेने कुमारे ओळखी काढ्यो. कुमारने जोइ ते रोवा लाग्यो त्यारे कुमारे घणे प्रकारे समजावी रोतो राखीने पूछ्युं के–'माराथी विखूटा पडीने तमे शुं शुं अनुभव्युं? ते कहो' वरधनु बोल्यो–'हे कुमार! ते वखते तमने वडला नीचे बेसाडीने हुं जळ लेवा गयो त्यां एक तळाव दीठुं तेमांथी जळ लइने हुं आवतो हतो तेटलामां दीर्घनृपना कवचन बद्ध भटो मळीने मने ओळखीने मारवाज मांड्या' अने 'ब्रह्मदत्त क्यां छे ते कहे' में कह्युं 'हुं नथी जाणतो' तेम तो वधारे मारवा लाग्या. मने बहु मार्यो त्यारे में कह्युं 'ब्रह्मदत्तने वाघे मारी नाख्यो' त्यारे कहे 'ते ठेकाणुं देखाड ज्यां वाघेब्रह्मदत्तनुं भक्षण कर्युं? एटले हुं मार खातो तमारा नजदीक प्रदेशमां आवीने ते वखते तमने इशारो कर्यो ते उपरथी तमे नासी गया अने ए भटो मने मारताज रह्या त्यारे मने एक परिव्राजके गुटिका आपेली ते गुटिका में मोढामां नाखी तेना प्रभावथी हु निश्चेष्ट बन्यो एटले 'आ तो मरी गयो' एम मानीने ए भट चाल्या गया.

For Private and Personal Use Only

तेषां गमनानंतरं चिरकालेन मया गुटिका मुखान्निष्कासिता. ततः सचेतनोऽहं त्वां गवेषयितुं प्रवृत्तः. न मया दृष्टस्त्वं, ततोऽहमेकं ग्रामं गतः, तत्र दृष्ट एकः परिव्राजकः, तेनोक्तमहं तव तातस्य मित्रं सुभगनामा, तव पिता धनुर्नष्टः, माता तु दीर्घेण गृहीता. मातंगपाटके च क्षिप्तास्तीति श्रुत्वाहमतीव दुःखितः कांपिल्यपुरे गतः, कापालिकवेषं कृत्वा मातंगमहत्तरं च वंचयित्वा मातंगपाटकान्मातरं निष्कासितवान्. एकस्मिन् ग्रामे पितृमित्रस्य देवशर्मब्राह्मणस्य गृहे मातरं मुक्त्वा त्वामन्वेषयन्नहमिहायातः. इत्थं यावत्तौ वरधनुब्रह्मदत्तौ वार्तां कुरुतस्तावेदकः पुरुषस्तत्रागत्यैवमुवाच, यथा महाभाग ! भवता कचिदितस्ततो न पर्यटितव्यं, त्वद्गवेषणार्थं दीर्घनियुक्ता नरा इहागताः संतीति श्रुत्वा तौ द्वावपि ततो वनान्नष्टौ, भ्रमंतौ च कौशांब्यां गतौ. तत्र बहिरुद्याने द्वयोः श्रेष्ठिसुतयोः सागरदत्तबुद्धिलनाम्नोः कुर्कुटयुगलं लक्षपणकरणपूर्वकं योध्धुं प्रवृत्तं दृष्टुं कौतुकेन तौ तत्रैव स्थितौ.

---

ते गया पछी पेली गुटिका मुखमांथी काढी लीधी के तरत हुं सचेतन थयो अने तमने गोतवा नीकल्यो. क्यांय तमने दीठा नहिं तेथी हुं एक गाममां गयो त्यां एक परिव्राजक=संन्यासी=दीठो तेणे कह्युं–हुं तारा बापनो मित्र छुं मारुं नाम सुभग छे. तारा पिता धनु नष्ट थया, तारी माने दीर्घराजाए पकडीने ढेढवाडामां राखी छे. आ वात सांभळी मने बहु दुःख थयुं तेथी हुं कांपिल्यपुरमां गयो त्यां कापालिक=अघोरी=नो वेश लइ ए ढेढोना महेतरने छेतरी ए ढेढवाडांमांथी मारी माने मुकावी एक गाममां मारा बापना मित्र देवशर्मा ब्राह्मणने घरे मारी माने राखीने पाछो तमारी शोधमां हुं अहिं आव्यो, आवी रीते वरधनु तथा ब्रह्मदत्तकुमार ज्यां वातो करे छे त्यां एक पुरुषे आवीने कह्युं के–'हे महाभाग ! तमारे आम तेम पर्यटन न करवुं कारणके तमने गोतवा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





माटे दीर्घराजाए मोकलेला मनुष्यो अहीं आवी पहोंच्या छे.' आ सांभळीने बेय जणा त्यांथी नाठा ते फरता फरता कौशंबी नगरीमां गया. त्यां बहारना बगीचामां सागरदत्त तथा बुद्धिवल नामना बे शेठीयाना दीकरा एक लक्ष रुपैया हारे ते आपे एवी शरतथी पोताना बे कुकडाने लडावता हता त्यां आ बे जणा कौतुकथी जोवा उभा.

बुद्धिलकुर्कुटेन सागरदत्तकुर्कुटः प्रहारेण जर्जरीकृतो भग्नः, सागरदत्तेन प्रेर्यमाणोऽपि स्वकुर्कुटो बुद्धिलकुर्कुटेन समं पुनर्योध्धुं नाभिलषति. हारितं लक्षं सागरदत्तेन. अत्रांतरे वरधनुनोक्तं भो सागरदत्त ! एष सुजातिरपि कुर्कुटः कथं भग्नः ? ममात्रार्थे विस्मयोऽस्ति. यदि कोऽपि कोपं न करोति तदा बुद्धिलकुर्कुटमहं पश्यामि. सागरदत्तो भणति भो महाराज ! विलोकय? नास्त्यत्र मम कोऽपि द्रव्यलोभः, किंत्वभिमानसिद्धिमात्रप्रयोजनमस्तीति. ततो वरधनुना विलोकितः स कुर्कुटः, तच्चरणनिबद्धः सूचीकलापो दृष्टः, बुद्धिलोऽपि वरधनुंप्रति शनैरेवमाह यदि त्वं सूचीकलापं न वक्ष्यसि, तदाहं तव लक्षार्धं दास्यामि. ततो वरधनुनोक्तं विलोकितो यत्कुर्कुटो नात्र किंचिद् दृश्यते, एवमुक्त्वापि यथा बुद्धिलो न जानाति तथा सूचीकलापमाकृष्य सागरदत्तस्य तद्व्यतिकरः कथितः. सागरदत्तेन पुनः स्वकुर्कुटः प्रेरितो बुद्धिलकुर्कुटेन समं युद्धं प्रवृत्ते. सागरदत्त कुर्कुटेन जितो बुद्धिकुर्कुटः, हारितं बुद्धिलेन लक्षं. तुष्टः सागरदत्त एवमाह आर्यपुत्र ! गृहे गम्यते, इत्युक्त्वा द्वावपि कुमारौ रथे निवेश्य सागरदत्तः स्वगृहे गतः, सागरदत्तस्तौ परमप्रीत्या पश्यति, सागरदत्तस्नेहनियंत्रितौ तावतीवाग्रहात्तद्गृह एव तस्थतुः.

बुद्धिलना कुकडाए सागरदत्तना कुकडाने प्रहारथी खोखरो करी नाख्यो. ते वखते सागरदत्ते पोताना कुकडाने घणो उश्केरवा

मांड्यो पण ते बुद्धिलना कुकडा साथे फरी लडवा नज मंड्यो. सागरदत्त लक्ष रुपैया हारी गयो. आ वखते वरनुए कह्युं–हे सागरदत्त ! तमारो आ कुकडो जातवान् छतां केम भग्न थयो? मने आ बाबत विस्मय थाय छे. जो गुस्से न थाओ तो बुद्धिल शेठनो शेठनो कुकडो मारे जोवो छे. सागरदत्ते कह्युं 'हे महाराज भले जुओ मने आमां कोइ प्रकारनो द्रव्य लोभ नथी किंतु अभिमान सिद्धि मात्र प्रयोजन छे. ते पछी वरधनुए बुद्धिलनो कुकडो तपास्यो तो तेना पगमां बांधेल सोयोनो जथ्थो दीठो. बुद्धिले पडखे चडीने धीरेथी वरधनुने कह्युं के मारुं पोकळ उघाडुं न करशो हुं मने जे लक्ष रुपैया मळशे तेमां अर्ध लक्ष तमने आपीश. वरधनुए कह्युं–जोयो कुकडो एमां कांइ नथी. आम बोलतां पण बुद्धिल न जाणे तेवी रीते तेना कुकडाना पगमांनी सोइओ खेंची लीधी अने ए हकीकत सागरदत्तने जणावी दीधी. सागरदत्ते फरीथी पोताना कुकडाने प्रेरणा करी अने बुद्धिलना कुकडा साथे लडावतां सागरदत्तना कुकडाए बुद्धिलना कुकडाने जीत्यो एटले बुद्धिल एक लक्ष रुपैया हार्यो. आथी सागरदत्त प्रसन्न थइ–'चालो आपणे घरे' एम कही आ बेय कुमारोने पोताना रथमां बेसाडी घरे तेडी गयो. त्यां आ बन्नेने सागरदत्ते परम प्रीतिथी सत्कार पूर्वक राख्या. सागरदत्तना प्रेमथी बंधायेला तेना आग्रहथी बेय कुमारो तेना घरमां रहेवा लाग्या.

**कियद्दिनानतरमेको दासस्तत्रायातः, तेनैकांते वरधनुकुमाराय, तव तदानीं सूचीव्यतिकरद्रव्य स्वमुखोक्तं, बुद्धिलेन तद्द्रव्यार्पणायायं हारः प्रेषितोस्ति, इत्युक्त्वा हारकरंडिका तेन वरधनवे दत्ता, दासः स्वगृहे गतः, वरधनुरपि हारकरंडिकां गृहीत्वा ब्रह्मदत्तांतिके गतः, स्वरूपं कथयित्वा हारकरंडिकातो हारं निष्कास्य दर्शितवान्. हारं पश्यता ब्रह्मदत्तेन हारैकदेशस्थो ब्रह्मदत्तनामांकितो लेखो दृष्टः पृष्टं च मित्र ! कस्यैष लेखः ? वरधनुर्भणति को जानाति ? ब्रह्मद-**

रनामकाः पुरुषा बहवः संति. ततो दूरे गत्वा वरधनुनोत्कीर्णो लेखः, तन्मध्ये इयं गाथा दृष्टा–पत्थिज्जइ जइ विजए। जणेग संजोयजणियजत्तेणं ॥ तहवि तुमं चिय धणिअं। रयणवई मुणे माणेउं ॥१॥ सूक्ष्मबुध्ध्या ध्यायता वरधनुनास्या गाथाया अर्थोऽवगतः.

केटलाक दिवस पछी त्यां एक दास आव्यो तेणे वरधनुने एकांतमां बोलावीने कह्युं के–'बुद्धिल शेठे तमने सोइओ संबंधे जे द्रव्य पोताने मुखे आपवानुं कहेल ते द्रव्य आपवा आ हार तेओए मोकल्यो छे,' आटलुं बोली हारनो करंडीयो तेणे वरधनुने दइने दास घरे गयो. वरधनु पण हारनो करंडीयो लइ ब्रह्मदत्तनी पांसे जइ पोतानी हकीकत कही करंडीयामांथी काढीने हार देखाड्यो, ब्रह्मदत्ते हार जोतां हारना छेडामां बांधेल पोताना नामनो लेख जोयो अने पूछ्युं के–'हे मित्र! आ लेख केनो छे?' वरधनु कहे केम खबर पडे? ब्रह्मदत्तनामना तो घणाय पुरुषो होय. ते पछी जरा दूर जइने वरधनुए ते लेख उखेडतां तेमां आ गाथा लखेली जोइ–'यद्यपि संयोग जनित यत्न वडे आ जननी बहुये प्रार्थना करे छे तथापि रत्नवती तो पोताना चित्तना स्वामी तमनेज करवा चाहे छे.' सूक्ष्मबुद्धिथी विचारी वरधनुये आ गाथानो अर्थ जाणी लीधो.

द्वितीयदिने एका परिव्राजिका तत्रायाता, सा कुमारशिरसि कुसुमाक्षतानि प्रक्षिप्य कुमार! त्वं शतसहस्रायुर्भवेत्याशिषं ददौ, ततः सा वरधनुमेकांते नयति, तेन समं किंचिन्मंत्रयित्वा सा प्रतिगता. कुमारेण वरधनुर्जल्पितः, अनया विमुक्तं? वरधनुर्भणति अनयैवमुक्तं यत्तव बुद्धिलेन करंडे हारः प्रेषितोऽस्ति, तेन समं च यो लेखः समागतोऽस्ति, तत्प्रतिलेखं समर्पय? मयोक्तमेष लेखो ब्रह्मदत्तराजनामांकितो वर्तते, ततस्त्वमेव वद? कोऽसौ ब्रह्मदत्तः?

तयोक्तं श्रूयतां, परं कस्यापि त्वया न वक्तव्यं. इह नगर्यां श्रेष्ठिपुत्री रत्नवतीनाम्नी कन्यकास्ति. सा बालभावादारभ्यातीव मम स्नेहानुरक्ता यौवनमनुप्राप्ता.

बीजे दिवसे एक परिव्राजिका त्यां आवी कुमारना मस्तक उपर पुष्प तथा अक्षत नाखी 'हे कुमार! तमे सेंकडो वर्षना आयुष्यवाळा थाओ' एम आशीष आपीने वरधनुने एकांतमां लइ जइ तेनी साथे कंइ वार्त्तालाप करीने चाली गइ. कुमारे वरधनुने पूछ्युं के—'तेणीए शुं कह्युं? वरधनु बोल्यो—'ते एम बोली के—बुद्धिले तमने जे करंडीयामां हार मोकल्यो ते साथे एक लेख आवेल छे तेनो प्रतिलेख=जवाब=लखी आपो' में कह्युं—ए लेख तो ब्रह्मदत्तराजाना नामनो छे तो तुंज कहे के ते ब्रह्मदत्त क्यां? त्यारे ते बोली के—हुं तमने कहुं ते सांभळो, आ वात तमारे कोइने कहेवी नहिं. आ नगरीमां एक महोटा शेठीयानी पुत्री रत्नवती नामनी छे ते बाळपणथीज अत्यंत मारा प्रति स्नेहथी अनुरक्त छे, ते यौवनावस्थामां आवी छे.

अन्यदिने सा किंचिध्ध्यायंती मया दृष्टा, पृष्टा च पुत्रि! त्वं किं ध्यायसीति. सा किमपि नैव बभाण. परिजनेनोक्तमियं बहून प्रहरान् यावदीदृश्येव किंचिदार्त्तध्यानं कुर्वती दृश्यते, परमस्या हार्दं न ज्ञायते. ततः पुनरपि तस्याः पृष्टं, परं सा किंचिन्नोवाच. तत्सख्या प्रियंगुलतिकया उक्तं, हे भगवति! तव पुरः सा लज्जया किंचिद्वक्तुं न शक्नोति, अहं तावत्कथयामि, इयं गतदिने क्रीडार्थमुद्याने गता, तत्रानया स्वभ्रातुर्बुद्धिलश्रेष्ठिनः कुर्कुटयुद्धं कारयतः समीपे एको वरकुमारो दृष्टः, तं दृष्ट्वैषा एतादृशी जाता. कुमारीसख्याः प्रियंगुलतिकाया एतद्वचः श्रुत्वा मयोक्तं पुत्रि! कथय सद्भावं, पुनः पुनरेवं मयोक्ता सा कथमपि सद्भावमुक्त्वा प्राह भगवति! त्वं मम जननीसमानासि, न किंचि-

तवाकथनीयं. अनया प्रियंगुलतिकया कथितो यो ब्रह्मदत्तः कुमारः, स मे पतिर्भविष्यति तदा वरं, अन्यथाहं मरिष्यामि. सा मया भणिता वत्से! धीरा भव? अहं तथा करिष्ये, यथा तव समीहितं भविष्यति. ततः सा किंचित् स्वस्था जाता.

एक दिवसे उंडा विचारमां पडेली में तेने जोइ त्यारे तेणीने में पूछयुं के–'हे पुत्रि तुं शा विचारमां पडी छो?' तेणीये कंइ पण प्रत्युत्तर न दीधो पण तेना परिजन=दासी वर्गे कह्युं के–घणीवार आवीज रीते कंइक आर्त्तध्यान=चिंता करती देखीये छीये पण एनुं हार्द जाणी शकातुं नथी. त्यारे फरीथी में तेणीने पूछयुं परंतु ते कंइज न बोली पण तेनी एक आभ्यंतर सखी प्रियंगुलतिका नामनी हती तेणीये कह्युं के–'हे भगवति! तमारी आगळ शरमने लीधे कंइ बोली नथी शकती, हुंज तमने कही दउं 'आ गइ काल बगीचामां क्रीडा अर्थे गइ हती त्यां एणे पोताना भाइ बुद्धिल शेठ कुकडा वढाडता हता तेनी समीपे एक उत्तम कुमार दीठो तेने जोइनेज आवी बनी गइ छे.' कुमारीनी सखी प्रियंगुलतिकाना आ वचन सांभळीने में कह्युं–'हे पुत्रि! तारा मननो भाव कही नाख. आम में ज्यारे वारंवार कहेवा मांडयुं त्यारे तेणीये बहुज खंचाइने कह्युं के–'हे भगवति! तमे तो मारा जननी समान छो. तेथी तमने कंइ पण न कहेवाय तेवुं नज होय. आ प्रियंगुलतिकाए जे ब्रह्मदत्त कुमार कह्यो ते मारो पति थाय तोज सारुं, अन्यथा हुं मरी जइश.' त्यारे में तेणीने कह्युं के—'हे वत्से! धीरी था, हुं तेम करीश के जेथी तारुं धार्युं सिद्ध थशे.' ते पछी ते कंइक स्वस्थ थइ.

कल्यदिने पुनरेवं मया तस्या विशेषाश्वासनकरणार्थं कल्पितमेवोक्तं, वत्से स ब्रह्मदत्तकुमारो मया दृष्टः. तथापि

समुच्छ्वसितरोमकूपया भणितं, भगवति ! तव प्रसादेन सर्वं भव्यं भविष्यति, किंतु तस्य विश्वासनिमित्तं बुद्धिलव्यपदेशेन इमं हाररत्नं करंडके प्रक्षिप्य ब्रह्मदत्तराजनामांकितलेखसहितं कृत्वा कस्यचिद्धस्ते प्रेषय? ततो मया कल्ये तथा विहितं, एष लेखव्यतिकरः सर्वोऽपि मया तव कथितः, सांप्रतं प्रतिलेखं देहि ? ततो मयापि तस्याः प्रतिलेखो दत्तः, तन्मध्ये चेदृशी गाथा लिखितास्ति–गुरुगुणवरधणुकलिओ । तं माणिओ मुणइ बंभदत्तोवि ॥ रयणवई रयणमई । चंदोवि य चंदमा जोगो ॥ १ ॥ इदं वरधनूक्तमाकर्ण्य अदृष्टायामपि रत्नवत्यां परमप्रेमवान् कुमारो जात.. तद्दर्शनसंगमोपायमन्वेषमाणस्य कुमारस्य गतानि कतिचिद्दिनानि.

गइ काले वळी तेने विशेष आश्वासन देवा में कल्पित वचनज कही दीधुं के–'हे वत्से ! में ते ब्रह्मदत्तकुमार दीठो' त्यारे तेना रुंवाडांना कळीया खीली गया अने बोली के–'भगवति ! तमारा प्रसादथी सर्व सारुंज थशे, किंतु तेने विश्वास बेसाडवा बुद्धिलना नामथी आ हाररत्न करंडियामां नाखी ब्रह्मदत्तराजाना नामवाळा लेख सहित कोइना हस्तक तेने पहोंचडावो. आ उपरथी में काले ते प्रमाणे कर्युं. आ में तमने लेख संबंधी सर्व हकीकत कही देखाडी हवे ए लेखनो जवाब लखीने आपो.' ते पछी में पण तेणीने प्रतिलेख लखीने दीधो; तेमां आ गाथा लखी—'गुणवान वरधनुना कहेवाथी ब्रह्मदत्त पण रत्नमयी रत्नवतीए मानित थइ चंद्रिकाने चंद्रमां योग्य माने छे. १' आ वरधनुए कहेलुं सांभळी हजु दीठी नथी तो पण ए रत्नवतीमां ब्रह्मदत्तकुमार परमप्रेमवान् बन्यो; अने तेणीना दर्शन तथा संगमना उपायनी शोधमां कुमारना केटलाक दिवसो वीत्या.

अन्यदिने समागतो नगरबाह्याद्वरधनुरेवं वक्तुं प्रवृत्तः, यथा एतन्नगरस्वामिनो दीर्घनृपेण स्वकिंकरा आवयोर्ग-

वेषणाय प्रेषिताः संति. नगरस्वामिना चावयोर्ग्रहणोपायः कारितोऽस्ति, एतादृशी लोकवार्ता बहिः श्रुता. सागरदत्तेन एतद्व्यतिकरं श्रुत्वा तौ द्वावपि भूमिगृहे गोपितौ. रात्रिः पतिता, कुमारेण सागरदत्तस्य भणितं तथा कुरु? यथावामपक्रमावः. एतदाकर्ण्य सागरदत्तस्ताभ्यां द्वाभ्यां सह नगराद्बहिर्निर्गतः. स्तोकां भूमिं गत्वाऽनिच्छंतमपि सागरदत्तं बलान्निवर्त्य कुमारवरधनु द्वावपि गंतुं प्रवृत्तौ. पथि गच्छद्भ्यां ताभ्यां यक्षायतनमोद्यानपादपांतरालस्थिता प्रहरणसमन्वितरथवरसमीपस्था एका प्रवरमहिला दृष्टा, ततस्तया समुत्थाय सादरं तौ भणितौ, किमियत्यां वेलायां भवंतौ समायातौ? इति तस्या वचः श्रुत्वा कुमारः प्राह, भद्रे! कौ आवां? तयोक्तं त्वं स्वामी ब्रह्मदत्तोऽयं च वरधनुः कुमार इति.

---

एक दिवसे बहारथी आवीने वरधनुए कह्युं के–आ नगरना राजा पांसे दीर्घनृपे पोताना नोकरोने आपणने गोतवा माटे मोकल्या छे अने आ नगरना स्वामीये आपणने पकडवा माटे उपायो योज्या छे. आवी लोकवार्त्ता में बहारथी सांभळी. सागरदत्त शेठे आ हकीकत सांभळीने बन्ने कुमारोने पोताना घरना भोंयरामां संताड्या. रात्र पडी त्यारे कुमारे सागरदत्तने कह्युं 'तमे एवी गोठवण करो के अमे अहींथी भागी नीकळीए. आ वचन सांभळीने आ बेय कुमार साथे नगरनी बहार नीकल्या, थोडेक दूर जतां पाछा वळवा न इच्छता सागरदत्तने बलात्=पराणे=पाछा वाळी कुमार तथा वरधनु बेय चालता थया. मार्गमां आगळ चालतां तेओए यक्षस्थानना उद्याननी अंदर वृक्षोना वचमां हथीयार युक्त रथना समीपमां बेठेली एक उत्तम स्त्री दीठी. ते स्त्रीए उभा थइ आदर पूर्वक ते बेय कुमारोने कह्युं के–केम आटलीज वारमां आप बन्ने अहीं आवी पहोंच्या? आवुं तेणीनुं वचन सांभळी कुमार

बोल्या के-'अमे कोण छइए?' ते बोली के-'तमे स्वामी ब्रह्मदत्त अने आ वरधनु कुमार.'

कुमार उवाच कथमेतदवगतं त्वया? सा उवाच श्रूयतां ? इहैव नगर्यां धनप्रवरो नाम श्रेष्ठी वर्तते, तस्य धनसंचया भार्या वर्तते, तया अष्टपुत्राणामुपर्येका पुत्री प्रसूता, सा चाहमेव. मम च कोऽपि पुरुषो न रोचते, ततो मातुरनुज्ञयाहं यक्षमाराधितुं प्रवृत्ता. तुष्टेन यक्षेणैवमुक्तं, वत्से ! तव भर्ता भविष्यचक्रवर्ती ब्रह्मदत्तो भविष्यति. स वरधनुमित्रसहितो ब्रह्मदत्तकुमार उपलक्ष्यः. ततः परं मया हारलेखप्रेषणादिकं यत्कृतं, तत्सर्वं तव सुप्रतीतमेवास्तीति कुमारीवाक्यमाकर्ण्य सानुरागः कुमारस्तया सह रथमारूढः. सा कुमारेण पृष्टा, इतः क्व गंतव्यं? रत्नवत्या भणितं, अस्ति मगधपुरे मम पितुः कनिष्ठभ्राता धनसार्थवाहनामा श्रेष्ठी, स ज्ञातव्यतिकरो युवयोर्मम च समागमनं सुन्दरं ज्ञास्यति, ततस्तत्र गमनं क्रियते, पश्चाद्यथा युवयोरिच्छा तथा कार्यमिति रत्नवतीवचसा कुमारो मगधपुराभिमुखं गंतुं प्रवृत्तः, वरधनुस्तदा सारथिर्बभूव. ग्रामानुग्रामं गच्छंतौ तौ कौशांबीदेशान्निर्गतौ.

कुमारे कह्युं-'तमे अमने केम ओळख्या?' ते बोली के-'सांभळो, आ नगरीमां धनप्रवर नामना शेठ छे तेना धनसंचया नामनी भार्या छे तेणीए आठ पुत्र उपर एक पुत्रीने जन्म आप्यो ते आ हुं. मने कोइ पुरुष गमतो नहि तेथी मारी मातानी आज्ञाथी में यक्षनी आराधना करवा मांडी. ए यक्षे तुष्ट थइने मने कह्युं के-'हे वत्से! हवे पछी ब्रह्मदत्त नामे चक्रवर्ती थशे ते तारो भर्त्ता थशे, ते पोताना मित्र वरधनु सहित हशे ते उपरथी ब्रह्मदत्तकुमार ओळखी लेवो. ते पछी में हार तथा लेख मोकलवानुं जे कर्युं ते सघळुं तो आपना जाणवामांज छे.' आवा कुमारीना वाक्य सांभळीने ब्रह्मदत्त कुमार प्रेमाधीन बनी ते कन्यानी साथे रथमां चड्या;

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





कुमारे ते कन्याने पूछयुं के-अहींथी क्यां जवानुं छे?' रत्नवतीए उत्तरमां कह्युं के-'अहीं मगधपुर जवानुं छे, त्यां मारा बापना न्हाना भाइ धनसार्थवाह नामना शेठ रहे छे तेमने आ बधी वातनी खबर छे तेथी ते तमारुं तथा मारुं समागमन सुंदर रीते जाणशे, त्यां आपणे जइये छीये, पछी आपनी जेम इच्छा होय तेम करवुं.' रत्नवतीना आवां वचन सांभळी कुमार ब्रह्मदत्त मगधपुर भणी जवानी प्रवृत्ति करी, त्यारे वरधनु सारथि बन्या, आम गामे गाम थतां तेओ कौशांबी प्रदेशमांथी नीकळी गया.

अन्यदागतौ गिरिगुहाटव्यां, तत्र कंटकसुकंटकाभिधानौ द्वौ चौरसेनापती तं प्रवरं रथ विभूषितं स्त्रीरत्नं च प्रेक्ष्य तद्रक्षकं च कुमारद्वयमेव सन्नद्धौ सपरिवारौ प्रहर्तुमायातौ. अत्रावसरे कुमारेण तथा प्रहरणशक्तिर्दर्शिता, यथा सर्वेऽपि चौरसुभटाः कुमार प्रहाराज्जर्जराः सर्वासु दिक्षु गताः. कुमारस्ततो रथारुढश्चलितः, वरधनुनोक्तं कुमार ! यूयं दृढश्रांताः, ततो मुहूर्तमात्रमत्रैव रथे निद्रासुखमनुभवत ? ततो रत्नवत्या सह कुमारः प्रसुप्तः, गिरिनदी एका मार्गे समायाता, तावत्तुरंगमाः श्रमखिन्ना नाग्रे चलंति, ततः कथंचित्प्रतिबुद्धः कुमारः श्रमखिन्नांस्तुरंगमान् पश्यन् रथाग्रे च वरधनुमपश्यन् जल निमित्तं वरधनुर्गतो भविष्यतीति चिंतितवान्. इतस्ततः पश्यन् कुमारो रथाग्रभागं रुधिरावलिप्तं ददर्श. ततो व्यापादितो वरधनुरिति ज्ञात्वा हा हा ! हतो मे सुहृदिति शोकार्त्तःकुमारो रथोत्संगात्पपात, मूर्छां च प्राप्तवान्.

आगळ चालतां तेओ गुफाओवाळा पर्वतयुक्त अरण्यमां आवी चड्या, त्यां कंटक तथा सुकंटक नामना बे चोर सेनापति, ए शणगारेला श्रेष्ठ रथने तथा तेमां बेठेल स्त्री रत्नने जोइ तेमज एनी रक्षा करनारा बे कुमारज छे एम धारी परिवार सहित तैयार

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





थइ हणवा आव्या; आ प्रसंगे कुमारे एवी तो पोतानी प्रहार करवानी शक्ति देखाडी के ए बधाय चोर लडवैयाओ कुमारना प्रहारथी जाजरा बनी चारेकोर दिशाओमां जीव लइ भागी नीकळ्या. त्यार पछी रथ उपर चडी कुमार चालता थया. वरधनुए कुमारने कह्युं तमे बहु श्रम लीधो तेथी थाक्या हशो माटे मुहूर्त्त मात्र ( बे घडीज ) आ रथमां जरा निद्रासुख अनुभवो–एटले कुमार रत्नवतीनी साथे रथमां सूता. मार्गमां एक पर्वतना वचमां नदी आवी त्यां सूधीमां तो घोडा थाकीने लोथ जेवा थइ गया हता अने आगळ जराय चालता नहोता ते वारे कंइ कारणथी कुमार जागी उठ्या, जुए छे तो घोडा छेक थाकी गयेला छे अने रथनी आगळ वरधनुने न जोया तेथी 'वखते जळ लेवा गयेल हशे.' एम धार्युं. आम तेम नजर फेरवतां कुमारे रथनो आगलो भाग रुधिरथी खरडायेलो जोयो ते उपरथी 'वरधनु मराणो' एम जाणी 'हायरे मारो सुहृद् हणाणो' आम शोक पीडित थइ बोलता कुमार रथमांथी मूर्छा खाइने पडी गया.

पुनरपि लब्धचैतन्यः स एवं विललाप, हा भ्रातः! हा वरधनुमित्र! त्वं क गतोऽसीति विलपन् कुमारः कथमपि रत्नवत्या रक्षितः. कुमारो रत्नवतींप्रत्येवमाह सुंदरि! न ज्ञायते वरधनुर्मृतो जीवन् वास्तीति. ततोऽहं तदन्वेषणार्थं पश्चाद् व्रजामि. तया भणितमार्यपुत्र! अवसरो नास्ति पश्चाद्वलनस्य, येनाहमेकाकिनी, चौरश्वापदादिभीमं चारण्यमिदं, अत्र च निकटवर्ती सीमावकाशोऽस्ति, येन परिम्लानाः कुशकंटका दृश्यंते. एतद्रत्नवतीवचः प्रतिपद्य रत्नवत्या सह कुमारः पथि गंतुं प्रवृत्तः. मगधदेशसंधिसंस्थितमेकं ग्रामं च प्राप्तः. तत्र प्रविशन् कुमारः सभामध्यस्थितेन ग्रामाधिपतिना दृष्टः. दर्शनानंतरमेव एष न सामान्यः पुरुष इति ज्ञात्वा सोपचार प्रतिपत्त्या पूजितो नीतश्च स्वगृहं. दत्त-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





स्तत्र सुखावासः, तत्र सुखं तिष्टन् स एकदा ग्रामाधिपतिना भणितः, कुमार! त्वं विखिन्न इव किं लक्ष्यसे? कुमारेणोक्तं मम भ्राता चौरेण सह भंडनं कुर्वन् न जाने कामप्यवस्थां प्राप्तः, ततो मया तदन्वेषणार्थं तत्र गंतव्यं.

थोडीवारे शुद्धिमां आवतां पाछा 'हे भाइ! हे वरधनु मित्र! तुं क्यां गयो?' आम विलाप करता कुमारने रत्नवतीए केमे करीने छाना राख्या. कुमारे रत्नवतीने कह्युं के—'हे सुंदरि! वरधनु जीवे छे के मरी गयो ते नथी जणातुं तेथी हुं तेने गोतवा पाछो जइश. त्यारे रत्नवती कहे 'आर्यपुत्र! पाछा वळवानो आ अवसर नथी कारणके हुं एकली छुं तेम चोर तथा सिंहव्याघ्र जेवां हिंसक प्राणिथी भयानक एवुं आ अरण्य छे अहींथी सीमाडो नजीक होय एम जणाय छे केमके आ बधा कुश कंटक छेक करमाइ गयेला देखाय छे.' आवुं रत्नवतीनुं वचन मान्य करीने रत्नवती सहित कुमारे आगळ चालवा मांड्युं. एम करतां मगधदेशने सीमाडे आवेला एक गाममां आव्या. गाममां पेसतांज कुमारने सभामध्यमां बेठेला ग्रामधणीये जोया. देखतांवेतज 'आ कोइ सामान्य पुरुष नथी' एम जणातां विनय वचनथी सत्कारी कुमारने पोताने घरे लइ गयो. अने तेने सुख मळे एवुं रहेवाने स्थान आप्युं. त्यां सुखे रहेता हता तेवामां एक वखते ए ग्रामाधिपतिए कुमारने कह्युं के—'तमे खिन्न केम देखाओ छो?' त्यारे कुमारे कह्युं—मारो भाइ चोरनी साथे वढवाड करतां न जाणे कइ दशाने पाम्यो तेथी मारे तेने गोतवा पाछुं त्यां जवुं छे.

ग्रामाधिपेनोक्तमलं खेदेन, यद्यस्यामटव्यां स भविष्यति तदावश्यमिह प्राप्स्यामः, इति भणित्वा तेन प्रेषिता निजपुरुषा अटव्यां गत्वा समायाताः कथयंति, यदस्माभिः सर्वत्र स पुरुषो गवेषितः, परं कश्चिन्न दृष्टः, किंतू प्रहारापतितो बाण एवैष दृष्टः. ततः कुमारो वरधनुर्मृत इति चिरकालं शोकं चकार. एकदा रात्रौ तस्मिन् ग्रामे चौरधाटिः

For Private and Personal Use Only

पतिता, सा च बाणैः कुमारेण जर्जरीकृता नष्टा. अथ हर्षितो ग्रामाधिपतिर्ग्रामश्च. अथ ग्रामाधिपतिमापृच्छय ततश्चलितः कुमारः क्रमेण राजगृहं प्राप्तः, तत्र नगराद्बहिः परिव्राजकाश्रमे रत्नवतीं मुक्त्वा स्वयं नगराभ्यंतरे गतः. तत्रैकस्मिन् प्रदेशे तेन धवलगृहं दृष्टं; तदंतःप्रविष्टेन कुमारेण द्वे कन्ये दृष्टे, ताभ्यां कुमारं दृष्ट्वा प्रकटितानुरागाभ्यां भणितं, कुमार! युष्मादृशामपि पुरुषाणां रक्तजनमुत्सृज्य भ्रमितुं किं युक्तं? कुमारेणोक्तं स जनः कः? येनैवं यूयं भणथ. ताभ्यामुक्तं प्रसादं कृत्वासने निविशंतु भवंतः. तत उपविष्ट आसने कुमारः. ताभ्यां कुमारस्य मज्जनस्नानाद्युपचारं कृत्वोक्तं, कुमार! श्रूयततामस्मद्वृत्तांतः—

गामधणीए कह्युं के–'जराय खेद न करवो. जो आ जंगलमां हशे तो अवश्य गोती काढशुं? आम कहीने तेणे पोताना माणसो अटवीमां गोतवा मोकल्यां ते तपास करीने पाछा आवीने बोल्या के–अमे बधे ठेकाणे ते पुरुषनी गोता करी पण क्यांय दीठो नहि पण कोइने मारीने पडेलो आ बाण जड्यो छे. कुमार ब्रह्मदत्त तो वरधनु मरी गयो मानीने घणा वखत सूधी शोक करवा लाग्या. बन्युं एवुं के–एक रात्रे एज गाममां चोरोए धाड पाडी त्यारे आ कुमारे बाणवृष्टिथी सर्व चोरोने खोखरा करी नसाड्या तेथी गामनां लोक तथा गामधणी बहु हर्ष पाम्या. बीजे दिवसे गामधणीनी रजा लइ कुमार चाल्या अने क्रमे क्रमे चालतां राजगृह नगर आवी पहोंच्या, त्यां नगरनी बहार एक परिव्राजकना आश्रममां रत्नवतीने मूकी पोते नगरनी अंदर जाय छे त्यां एक प्रदेशमां ते कुमारे धोळुं घर जोयुं. जेमां प्रवेश करतां कुमारे बे कन्याओ दीठी. आ बेय कन्याओए कुमारने निरखी पोतानो तेना प्रतिनो अनुराग=स्नेह प्रकट सूचवीने कह्युं के–'हे कुमार! आप जेवा पुरुषोने अनुरक्तजननो परित्याग करी भमवुं शुं युक्त छे? कुमारे पूछयुं के–

'ए जन कोण? के जेने माटे तमे आवुं बोलो छो? बन्ने कन्यकाओ बोली के-अमारा उपर प्रसाद करीने अंदर आवी जरा आसने आप बेसो तो बधुं कहेवाय, ते पछी कुमार अंदर जइने आसने बेठा तदनंतर ए कुमारने स्नानादिक उपचार कर्या बाद ए कुमारिकाओए कह्युं के—'हे कुमार! सांभळो अमारो वृत्तांत—

इहैव भरतक्षेत्रे वैताढ्यगिरिदक्षिणश्रेणिमंडने शिवमंदरे नगरे ज्वलनशिखो राजा, तस्य विद्युच्छिखानाम्नी देवी, तस्या आवां द्वे पुत्र्यौ, अस्मद्भ्राता उन्मत्तो नाम वर्तते. अन्यदास्मत्पिताग्निशिखाभिधानेन मित्रेण समं यावद्गोष्ठ्यां प्रविष्टस्तिष्ठति, तस्मिन्नवसरेऽष्टापदपर्वताभिमुखं व्रजंतं सुरासुरसमूहं पश्यति. राजापि पुत्रीसहितस्तत्र गंतुं प्रवृत्तः, अष्टापदे प्राप्तो जिनप्रतिमाश्च वंदिताः, कर्पूरागुरुधूपाद्युपचारो महान् कृतः. प्रदक्षिणात्रयं गृहीत्वा निर्गच्छता राज्ञाऽशोकपादपस्याध उपविष्टं चारणमुनियुगलं दृष्टं प्रणतं च. तत्रोपविष्टस्य राज्ञः पुरस्तात् गुरुणैवं धर्मदेशना कर्तुमारब्धा-असारः संसारः, शरीरं भंगुरं, शरदभ्रोपमं जीवितं, तडिद्विलसितानुकारि यौवनं, किंपाकफलोपमा भोगाः, संध्यारागसमं विषयसुखं, कुशाग्रजलबिंदुचंचला लक्ष्मीः, सुलभं दुःखं, दुर्लभं सुखं, अनिवारितप्रसरो मृत्युः, तस्मादेवं स्थिते सति भो भव्याः! मोहप्रसरं छिंदंतु, जिनेंद्रधर्मे मनो नयंतु. एवं चारणश्रमणदेशनां श्रुत्वा सुरादयो यथाऽऽगतास्तथा गताः. तदा लब्धावसरेणाग्निशिखिना भणितं, यद्येतयोः बालिकयोः को भर्ता भविष्यति? चारणश्रमणाभ्यामुक्तमेते द्वे कन्ये भ्रातृवधकारिणो नार्यौ भविष्यतः. तयोरेतद्वचः श्रुत्वा राजा श्यामसुखो जातः.

आ भरतक्षेत्रमांज वैताढ्य पर्वतना दक्षिण प्रदेशना मंडनरुप शिवमंदर नामे नगर छे तेमां ज्वलनशिख नामनो राजा छे जेनी

विद्युच्छिखा नामे राणी छे तेनी अमे बेय पुत्रीओ छइए, अमारो भाइ उन्मत्त नामनो एक समये अमारा पिता पोताना मित्र अग्निशिखनी साथे गोष्ठी विनोदमां बेठा हता तेटलामां अष्टापद पर्वत फरता जता सुर तथा असुरना समूहने जोइ राजा पण पुत्री सहित त्यां जवा नीकळ्या. अष्टापद पहोंचीने जिन प्रतिमाओने वंदना करी कपूर अगुरु धूप इत्यादिक महान उपचार समर्पी त्रण प्रदक्षिणा करीने नीकळतां राजाए अशोक वृक्ष नीचे बेठेला बे चारण मुनि दीठा तेने वंदन करी त्यां बेठा त्यारे राजाने गुरुए आ प्रमाणे धर्मदेशना करवा मांडी 'संसार असार छे; शरीर क्षणभंगुर छे; शरदृतुना वादळां जेवुं जीवित छे. आ यौवन ता वीजळीना चमकारा समान छे, आ सर्व विषयोपभोग किंपाक=कुमडाना फळ जेवो परिणाम विरस छे विषय जन्य सुख तो संध्याना राग तुल्य क्षणिक छे. लक्ष्मी तो दर्भनी अणि उपर टकेला जळकण जेवी चपळ छे. दुःख सुलभ छे पण सुख तो अत्यंत दुर्लभ छे. अने मृत्यु तो कोइथी रोकी के अटकावी शकाय नहि तेवो छे. ज्यारे आम छे तो हे भव्य जीवो! मोहना फेलावाने छेदो, जिनेंद्र धर्ममां मन राखो; आवां चारण श्रमणनां उपदेश वचनो सांभळी सुर आदिक जेम आव्या हता तेम चालता थया. आ वखते अवकाश मळवाथी अग्निशिखे पूछ्युं के-'हे महाराज! आ बे बाळकीओने कोण वर मळशे?' चारण श्रमणे कह्युं-आ बेय कन्यानो ए कन्याना भाइनो वध करनारो वर थशे, अर्थात् ए कन्याना भाइने मारनारनी आ बेय कन्याओ भार्या थशे. आ सांभळी राजानुं मुख श्याम थइ गयुं.

अस्मिन्नवसरे आवाभ्यामुक्तं, तात! सांप्रतमेव साधुभ्यामुक्तं संसारस्वरूपं, तत आवयोरलमेवंविधावसानेन विषयसुखेन आवयोरेतद्वचस्तातेन प्रतिपन्नं. आवाभ्यां च भ्रातृस्नेहेन स्वदेहसुखकारणानि त्यक्तानि. भ्रातुरेव स्ना-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नभोजनादिचिंतां कुर्वन्तावावां तिष्ठावः. अन्यदास्मद्भ्राता पृथिवीं भ्रमता दृष्टा, कुमार! भवन्मातुलपुत्री पुष्पवती कन्यका. तद्रूपाक्षिप्तचित्तस्तां हृत्वा आगतः, परं तद्दृष्टिं सोढुमक्षमः, स विद्यां साधयितुं गतः. अतःपरं वृत्तांतो युष्माकं ज्ञानगोचरोऽस्ति. तस्मिन् काले भवदंतिकादागत्य पुष्पवत्या आवयोर्भ्रातृवधवृत्तांतः कथितः. ततः शोकभरेण आवां रोदितुं प्रवृत्ते, मधुरवचनैश्च पुष्पवत्या रक्षिते. तदा आवां शंकरीविद्यया एवं वक्तुं प्रवृत्ता, असौ भ्रातृवधकारी ब्रह्मदत्तश्चक्रवर्ती भविष्यति, युवां मुनिवचनं किं न स्मरथः? एतद्वचनमाकर्ण्य आवाभ्यां जातानुरागाभ्यां मानितं, परं पुष्पवत्या बालिकया स्नेहरसंभ्रांतया रक्तपताकां विहाय श्वेतपताका चालिता. तद्दर्शनानंतरं त्वमन्यत्र कुत्रापि गतः, नानाविधग्रामाकरनगरादिषु भ्रमंतीभ्यामावाभ्यां त्वं क्वचिन्न दृष्टः. ततो विखिन्ने आवामिहागते. सांप्रतमतर्कितहिरण्यसमं तव दर्शनं जातं. ततो हे महाभाग! पुष्पवतीव्यतिकरं स्मृत्वा कुरु अस्मत्समीहितं. एवं श्रुत्वा कुमारेण सहर्षं मानितं. गंधर्वविवाहेन तयोः पाणिग्रहणं कृतं.

आ वखते अमे बेय बेनोए कह्युं के–हे तात! हमणांज आ साधुओए संसारनुं स्वरुप तो कह्युं, माटे जे विषयसुखनो आवो परिणाम आवे तेवा सुखथी कंइ प्रयोजन नथी. पिताए अमो बन्नेनुं वचन कबूल राख्युं. भ्रातृस्नेहने लीधे अमे बन्ने बेनोए स्वदेह सुखनां कारणो त्यज्यां अने भाइनांज स्नान भोजनादि चिंतामां लागी रह्यां एक समये ए अमारा भाइए पृथिवीमां फरतां फरतां हे कुमार! तमारा मामानी पुत्री पुष्पवती कन्या दीठी तेना रूपथी विक्षिप्त चित्त बनी तेनुं हरण करी उपाडी आव्यो, परंतु ते कन्यानी दृष्टिनुं तेज सहन न थइ शकवाथी तेने स्ववश करवा ते विद्या साधवा माटे गयो. हवे पछीनो वृत्तांत तो सघळो आपनी

For Private and Personal Use Only

जाणमांज छे. ते समये आपनी पांसेथी आवीने पुष्पवतीए अमारा भाइना वधनो वृत्तांत अमने कह्यो तेना शोकना आवेगथी अमे रोवा मांडयुं त्यारे पुष्पवतीये मधुर वचनो वडे अमने रोता राख्या. पछी शांकरी विद्याना बळथी तेणे अमने कह्युं के—आ तमारा भाइनो वध करनार ब्रह्मदत्त चक्रवर्ती थशे, तमने पेला चारण मुनिनां वचन याद नथी आवतां? आ वचन सांभळतांज अमारा अंतः-करणमां प्रेम संचार थवाथी अमे तेनी वात मानी. पण स्नेहरसमां भ्रांत बनेली पुष्पवती बाळिकाये राती पताका न लेतां धोळी पताका चलावी ते जोतांज तमे क्यांक अन्यस्थाने जता रह्या. नानाविध गामोमां आकरोमां नगरोमां अमे भम्यां पण क्यांय तमने न दीठा तेथी अत्यंत खिन्न बनी अमे अहीं आवी रह्यां. आ टाणे अतर्कित सुवर्ण लाभ समान आपनुं दर्शन थयुं; माटे-हे महाभाग्यवान्! पुष्पवतीना प्रसंगने याद करी अमारुं पण अभीष्ट सिद्ध करो. आवां वचन सांभळी कुमारे हर्षपूर्वक तेओनी प्रार्थना मान्य करी गांधर्व विवाहथी ते बन्नेनुं पाणिग्रहण कर्युं.

---

एकरात्रौ ताभ्यां सममुषित्वा प्रभाते कुमारस्तयोरेवमुवाच, युवां पुष्पवत्याः समीपं गच्छतं, तया समं च तावत्स्थातव्यं यावन्मम राज्यलाभो भवति. एवं श्रुत्वा ते गते. तावत्कुमारो न तद्धवलगृहं न तं परिजनं च पश्यति, चिंतितवांश्च एषा विद्याधरीमायेति चिंतयन् रत्नवतीगवेषणनिमित्तं स तापसाश्रमाभिमुखं गतः. न च तत्र तेन रत्नवती दृष्टा, न चान्यः कोऽपि पुरुषो दृष्टः. ततः कं पृच्छामीति विचार्य स इतस्ततः पश्यति, तावदेको भद्राकृतिः पुरुषस्तत्रायातः, कुमारेण स पृष्टः, भो महाभाग! एवंविधरूपनेपथ्या एका स्त्री मयात्र मुक्ता, कल्येऽद्य वा त्वया सा दृष्टा? तेन भणितं पुत्र! त्वं किं तस्या रत्नवत्या भर्ता? कुमारो भणति एवं. तेन भणितं कल्ये सा मया रुदंती दृष्टा,

**अपराह्णकाले च तस्याः समीपे गतः, पृष्टा च सा मया पुत्रि! कासि त्वं? कुतः समागता? किं ते शोककारणं? क वा त्वया गंतव्यं? तया किंचित्कथिते सा मया प्रत्यभिज्ञाता, मम त्वं दौहित्री भवसीत्युदित्वा मया तस्य लघु पितुः समीपे गत्वादिष्टा. तेनाप्युपलक्ष्य सा विशेषादरेण स्वमंदिरे प्रवेशिता.**

अहीं आ बे विलासिनीओनी साथे एक रात्र रहीने प्रभाते कुमार बेय स्त्रीयोने बोल्या के-तमे बेय पुष्पवती पांसे जाओ, तेनी साथे ज्यां सुधी मने राज्य प्राप्ति थाय त्यां सूधी तमारे बन्नेये रहेवानुं छे, आ वचन सांभळी ते बन्ने पुष्पवती पांसे गया. तेटली वारमां कुमार जुए छे तो ते धोळो महेल के परिजन कशुं न देखाणुं तेथी जाण्युं के आ बधी विद्याधरी माया हती एम विचारी रत्नवतीनी शोधमां तापसाश्रम तरफ चाल्या. त्यां जइ जुए छे तो रत्नवती दीठी नहिं तेम बीजो कोइ पुरुष पण न दीठो, हवे केने पूछवुं? एम विचारतां आम तेम जुए छे तो एक सुंदर आकृतिवाळो पुरुष त्यां आव्यो तेने कुमारे पूछ्युं के-'हे महाभाग! आवां आवां रूपवाळी तथा आवां वस्त्र आभूषणवाळी एक स्त्री में अत्रे राखी हती ते काले के आजे तमे दीठी छे? तेणे कह्युं-'पुत्र! ते रत्नवतीनो भर्त्ता तुं? कुमारे कह्युं-'एमज' त्यारे ते पुरुष बोल्यो के-काले में तेणीने रोती दीठी नमते पहोरे हुं ते पासे गयो अने पूछ्युं के—'पुत्रि! तुं कोण छो अने क्यांथी आवे छे? आ शोकनुं कारण शुं छे? अने तारे क्यां जवानुं छे? तेणीए कइंक कह्युं तेटलाथी में तेणीने ओळखी लीधी; 'तुं मारी दौहित्री थाय छे' एम कही में तेणीना बापना न्हाना भाइनी पांसे जइ खबर दीधा ते उपरथी तेणीना ए काकाए पण ओळखी तेणीने घणा आदरथी पोताने घरे लइ जइ राखी.

**सर्वत्र त्वं गवेषितः परं न क्वचिद् दृष्टः, सांप्रतं सुंदरं जातं यत्त्वं लब्धः. एवमुक्त्वा नीतः कुमारस्तद्गृहे, उप-**

चारः कृतः, तत्र महोत्सवेन रत्नवतीपाणिग्रहणं कुमारः कृतवान्, तया सह विषयसुखमनुभवंश्च कियत्कालं तस्थौ. अन्यदा वरधनुवर्षदिवसोऽद्येत्युक्त्वा तद्गृहे कुमारेण ब्राह्मणादयो भोजिताः. अस्मिन्नवसरे वरधनुः कृतब्राह्मणवेषो भोजननिमित्तमागतः, एवं भणितुं प्रवृत्तश्च. भो ज्ञापयंतु तस्य भोज्यकारिणो यथा यदि मम भोज्यं प्रयच्छथ तदा तस्य परलोकवर्तिन उदरे भोज्यं संक्रामति. गृहपुरुषैस्तद्वचः कुमाराय शिष्टं, कुमारोऽपि गृहाद्बहिर्निर्गतः, दृष्टो वरधनुः प्रत्यभिज्ञातश्च. गाढं कुमारेणालिंगितो गृहमध्ये प्रवेशितश्च, स्नानमज्जनभोजनादिभि स्कृतश्च. अनंतरं कुमारेण पृष्टो वरधनुः स्ववृत्तांतं जगौ, यथा तस्यां रात्रौ निद्रावशमुपागतेषु युष्मासु सत्सु पृष्टतो धावित्वा चौरेणैकेन कुडंगांतरितेन मम पादे बाणप्रहारः कृतः, तद्वेदनापरवशोऽहं निपतितो महीतले, परमपायभीरुत्वेन मया युष्माकं न निवेदितं, रथस्त्वग्रे चलितः.

---

सर्व स्थळे तमने गोत्या पण क्यांय दीठा नहि, हवे बहु सारुं थयुं के तमे मळ्या? आम कहीने कुमारने ए पुरुष, रत्नवतीना काकाने त्यां लइ गयो त्यां सारी बरदास्त करावी. त्यां महोटा उत्सव साथे रत्नवतीनुं पाणिग्रहण कुमारने कराव्युं अने त्यां कुमार विषयसुखोनो अनुभव लेता केटलोक काळ स्थिति करी रह्या. एक दिवस कुमारे 'आज मारा मित्र वरधनुनो जन्मदिन छे' एम कही पोताने त्यां ब्राह्मणो जमाड्या तेमां ब्राह्मण वेष लइ वरधनु पोते जमवा आव्यो-आवीने एम बोल्यो के-आ भोजन करावनारने जइने कहो के-जो मने भोजन करावे तो ते परलोकवर्त्तीना उदरमां ए सघळुं भोज्य पहोंचशे. घरना माणसोए आवीने कुमारने आ वात करी तेथी कुमार पोते बहार आवी जुए छे तो वरधनुने दीठो अने ओळख्यो पण; कुमारे तेने आलिंगन करी घरमां लइ

आव्या, स्नान भोजनादि सत्कार कर्या पछी कुमारे तेनो वृत्तांत पूछतां वरधनु बोल्या के–आप ते रात्रीए निद्रावश थया त्यारे पाछळथी दोडता आवीने एक चोरे झाडना झुंडनी आडमां रहीने मारा पगमां बाणनो प्रहार कर्यो, तेनी वेदनाथी पराधीन जेवो बनेलो हुं पृथ्वीतल उपर पडी गयो, परंतु तमने फिकर थाय एनी बहीकथी तमने जाहेर न कर्युं अने रथ तो आगळ चालतो थयो.

अहं तु शनैः शनैः पतितवृक्षांतराले चलन् महता कष्टेन तस्मिन् ग्रामे प्राप्तो यत्र यूयं स्थिताः, तेन ग्रामाधिपतिना सत्कृतः. युष्माकं प्रवृत्तिं श्रुत्वाहमद्य प्रगुणीभूतो भोजनप्रस्तावे समागतः. यूयमद्य मद्भाग्यान्मिलिताः. अथ तयोस्तत्राऽवियुक्तयोः सहर्षं दिवसा यांति. अन्यदा ताभ्यां परस्परमेवं विचारितं, यथावाभ्यां कियत्कालं मुक्तपुरुषाकाराभ्यां स्थातव्यं? एवं च चिंतयतोस्तयोर्गतः कियान् कालः. अन्यदा तत्र समायातो मधुमासः, मदनमहोत्सवे जायमाने सर्वलोको नगराद्बहिः क्रीडितुमायातः, वरधनुकुमारावपि कौतुकेन नगराद्बहिर्गतौ.

ते पछी हुं धीमे धीमे पडेला वृक्षना वचगाळामां अति कष्टथी चालतो. जे गाममां तमे रह्या हता ते गामे पहोंच्यो, ए गामना धणीए मारी बरदास्त करी तेना पांसेथी तमारा समाचार सांभळी आज हुं बमणा उत्साहथी भोजन प्रसंगे आव्यो मारा सद्भाग्यने लीधे आजे तमे सर्व मने मळ्या, अहीं बेयना वियोगनो अंत आवतां बन्नेना दिवसो अत्यंत हर्षमां व्यतीत थता हता. एक समये बेय मित्रो परस्पर विचार दर्शावता हता तेमां कुमारे कह्युं 'आपणे आमने आम केटलाक काळ पर्यंत पुरुषार्थ रहित पड्या रहेशुं?' आम चिंता करतां करतां पण तेओनो केटलोक समय व्यतीत थयो. तेटलामां मधुमास आव्यो, मदनमहोत्सव चालु थतां सर्वे लोको गामथी बहार रम्मत गम्मत करवा नीकळ्या. वरधनु तथा कुमार पण कौतुकथी जोवा नगर बहार नीकळ्या.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





निर्भरक्रीडारसनिमग्ने लोकेऽतर्कित एव पातितमिंठो निरंकुशो राज्ञो हस्ती तत्रायातः, समुच्छलितकोलाहलो भग्नक्रीडारसो नष्टः समंतान्नारीनिकरः. एका च बालिका समुन्नतपयोधरा नश्यंती तस्य हस्तिनो दृष्टौ पतिता, सा शरणं मार्गयंती इतस्ततः पश्यति, तस्याः परिजनाः पूत्कुर्वन्ति. भयभ्रांतायास्तस्याः पुरो भूत्वा कुमारेण स करी हक्कितः, एषा च मोचिता. सोऽपि करी तां मुक्त्वा रोषवशविस्तारितलोचनः प्रसारितशुण्डादण्डः शीघ्रं कुमाराभिमुखं धावितः, कुमारेणाप्युत्तरीयवस्त्रं गजाभिमुखं प्रक्षिप्तं. गजेन तद्वस्त्रं शुण्डया गृहीत्वा गगने प्रक्षिप्तं, गगनाच्च पुनर्भूमौ निपतितं, तद्ग्रहणाय यावत्करी पुनर्भूम्यभिमुखं परिणमति, तावदुत्प्लुत्य कुमारस्तत्स्कंधमारूढः, स्वकरतलाभ्यां तत्कुंभस्थलमास्फालितवान्. मधुरवचनैश्च संतोषितः सन् करी स्ववशं नीतः. समुच्छलितः साधुकारः, जयति कुमार इति पठितं वंदिजनैः कुमारेण स करी आलानस्तंभसमीपं नीतो बद्धश्च.

लोको क्रीडारसमां निमग्न छे तेवामां अकस्मात मावतने पछाडी अंकुश विनानो राजानो हाथी धसी आव्यो. लोकोमां कोलाहळ उछळ्यो, रम्मतमां भंगाण पडयुं स्त्रीओनां टोळां चारेकोर भागनाश करवा लाग्यां. एक बाळा प्राप्त यौवना भागती हती तेना पर हाथीनी नजर पडतां हाथी तेना भणी दोडयो. ते बिचारी गभराटमां आम तेम जोतां शरण न जडवाथी भयभ्रांत थइ गइ अने तेनां संबंधीओ पोकार करे छे तेटलामां कुमारे आगळ थइने हाथीने हांक्यो अने ए बाळाने मुकावी एटले हाथी सुंढ लंबावतो, आंखो फाडी रोषे भराइने, बाळाने छोडीने कुमार उपर धस्यो, आ वखते कुमारे पोतानुं ओढवानुं वस्त्र हाथी सामे फेंक्युं, हाथीए ते वस्त्र सूंढवती उपाडीने आकाशमां उछाळ्युं ते वस्त्र पाछुं पृथ्वीपर पडयुं तेने उठाववा हाथी फरी भूमि तरफ जरा नीचो नमतो

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





हतो त्यां तेनी सूंढ पकडी ठेकीने कुमार हाथीनी कांध उपर चडी बेठो. पोताना बेय हाथवती ते हाथीना कुंभस्थळ उपर थावडीने तथा धीमा धीमा अनुकूळ अवाज करीने तेणे संतोष्यो तेथी ते हाथी ते कुमारने वश बनी गयो. जन समुदायमां कुमारनी वाह वाह कहेवाइ गइ बंदीजनो कुमारनो जय पोकारवा लाग्या अने कुमारे ते हाथीने तेनी अगडमां लइ जइ आलान=बांधवाना स्तंभ माथे बांधी दीधो.

नरपतिस्तमनन्यसदृशं दृष्ट्वा परमं विस्मयं प्राप्तः स्वमंत्रिणं पप्रच्छ, क एष? ततः कुमारस्वरूपाभिज्ञेन मंत्रिणोक्तं, एष ब्रह्मराज्ञः पुत्रो ब्रह्मदत्तकुमार इति. ततस्तुष्टेन राज्ञा नीतः कुमारः स्वभुवनं, सत्कृतश्च स्नानमज्जनभोजनादिभिः, ततः कुमारदत्तकुमार इति. ततस्तुष्टेन राज्ञा नीतः कुमारः स्वभुवनं, सत्कृतश्च स्नानमज्जनभोजनादिभिः, ततः कुमारस्याष्टौ स्वपुत्र्यो दत्ताः, महोत्सवपूर्वकं तासां पाणिग्रहणं कुमारेण कृतं. तत्र कियद्दिनानि वरधनुकुमारौ सुखेन स्थितौ. अन्यदा एका स्त्री कुमारसमीपमागत्य भणितुं प्रवृत्ता, यथा कुमार! अस्ति किंचिद्वक्तव्यं तव, कुमारेणोक्तं वद? सोवाच अस्यामेव नगर्यां वैश्रमणो नाम सार्थवाहः, तस्य पुत्री श्रीमत्यस्ति, सा मया बालभावादारभ्य पालिता, या त्वया तदानीं हस्तिसंभ्रमाद्रक्षिता. हस्तिसंभ्रमोद्धरिता सा तदानीं जीवितदायकं त्वां स्नेहेन विलोकयंती त्वदेकचित्ता त्वद्रूपलावण्यकलाकौशलमोहिता त्वामेव स्मरंती परिजनेन कथमपि स्वमंदिरं नीता, तत्रापि सा न मज्जनभोजनादिदेहस्थितिं करोति. तदानीं मया तस्या उक्तं, कथं त्वमकांडे ईदृशी जाता यावन्ममापि प्रतिवचनं न ददासि? हसित्वा सा एवमुवाच, हे अंब! भवत्याः किमकथनीयं? परं लज्जया किंचिद्वक्तुं न शक्नोमि, पुनर्मया सा ग्रहं पृष्टा

For Private and Personal Use Only

सोवाच, येनाहं हस्तिसंभ्रमाद्रक्षिता, तेन समं यदि मम पाणिग्रहणं न स्यात्तदा मेऽवश्यं मरणं, एवमुक्त्वा तयाहं तव समीपे प्रेषिता. अंगीकुरु तां बालिकां? कुमारेण तद्वचोंगीकृतं प्रशस्तदिवसे तस्याः पाणिग्रहणं कुमारेण कृतं. वरधनुना तु सुबुद्धिनामामात्यपुत्र्या नंदननाम्न्याः पाणिग्रहणं कृतं. एवं च द्वयोरपि विषयसुखमनुभवतोस्तयोर्गताः कियंतो वासराः, तयोः सर्वत्र प्रसिद्धिर्जाता.

राजा पण तेनी असाधारणता अवलोकी परम विस्मय पाम्यो, अने पोताना मंत्रीने पूछ्युं के-'आ कोण छे?' मंत्री कुमारना स्वरूपनो जाणकार हतो तेणे कह्युं के-'आ ब्राह्मराजाना ब्रह्मदत्त कुमार छे' आ वचन सांभळी तुष्ट थयेला राजाए कुमारने पोताने भवने लइ जइ स्नानमज्जन भोजन वगेरेथी सारो सत्कार कर्यो अने पोतानी आठ पुत्रीओ कुमारने आपी महोटा उत्सव पूर्वक कुमार साथे तेओना विवाह कर्या. त्यां केटलाक दिवस वरधनु तथा कुमार सुखथी रह्या. एक समये कोइ स्त्री कुमार पांसे आवीने बोली के-'हे कुमार! मारे आपने कंइ कहेवानुं छे.' कुमारे कह्युं-'जे कहेवानुं होय ते कहो' त्यारे ते स्त्री बोली के-'आज नगरीमां वैश्रमण नामनो एक सार्थवाह रहे छे, तेनी पुत्री श्रीमती नामे छे तेने में बाळपणाथीज पाळी महोटी करी छे जेने तमे ते टाणे हाथीना झपाटामांथी बचावी. ज्यारथी तमे तेणीनो हाथीना संभ्रममांथी उद्धार कर्यो. त्यारथी जीवितदान आपनार तमने मानी तमने स्नेहथी नीहाळती तमारामां एकाग्रचित्तवाळी ए कन्या तमारा रुप, लावण्य, तथा कला कौशलथी मोह पामीने तमारुंज ध्यान करती परिजने घरे पहोंचाडी त्यां पण ते नहावुं, भोजन करवुं, इत्यादि शरीर स्थिति पण करती नथी. में तेणीने कह्युं के-आम एकदम तुं आवी केम थइ गइ जे मने पण जवाब नथी देती.' त्यारे हसीने ते बोली-'हे मा! तमने न कहेवानुं शुं होय? पण लाजने लीधे

कंइ पण बोली शकती नथी.' फरी पण में आग्रहथी पूछ्युं त्यारे तेणे कह्युं के-'जेणे मने हाथीना झपाटामांथी बचावी तेनी साथे जो मारुं पाणिग्रहण न थाय तो अवश्य मारुं मरण थशे? आम कहीने तेणीये मने आपनी पांसे मोकली छे माटे ते बालानो अंगीकार करो.' कुमारे तेनुं वचन स्वीकार्युं. सारो दिवस जोइ कुमार ते बालाने परण्या. वरधनुए पण सुबुद्धि नामना मंत्रीनी नंदना नामनी पुत्रीनुं पाणिग्रहण कर्युं. एम बेय मित्रो विषयसुख अनुभवतां केटलाक दिवसो वीत्या तेवामां ते बन्नेनी लोकमां प्रसिद्धि पण थइ.

तावन्यदा गतौ वाराणस्यां, ब्रह्मदत्तं बहिः स्थापयित्वा वरधनुर्नगरस्वामिकटकसमीपं गतः, एष हर्षितः सबलवाहनः संमुखो निर्गतः, कुमारं च हस्तिस्कंधे समारोप्य नगरीप्रवेशोत्सवो महान् कृतः. स्वभवने नीतस्य कुमारस्य स्नानमज्जनभोजनादिसामग्रीं कृत्वा, प्रकामं सत्कारं कृत्वा च स्वपुत्री कनकवती अनेकहयगजरथद्रव्यकोशसहिता दत्ता, प्रशस्तविवाहो जातः, तया समं विषयसुखमनुभवतस्तस्य सुखेन कालो याति. ततो दूतसंप्रेषणेनाकारिताः सबलवाहनाः पुष्पचूलराजधनुमंत्रिकणेरदत्तभवदत्तादयोऽनेके राजमंत्रिणः समायाताः. तैः सर्वैः कुमारो राज्येऽभिषिक्तः. वरधनुस्तु सेनापतिः कृतः.

एक समये वरधनु तथा कुमार ब्रह्मदत्त बेय वाराणसी गया त्यां ब्रह्मदत्तने बहार बेसाडीने वरधनु नगराधिपति कटक राजानी पांसे गया, तेने जोइ हर्ष पामेला राजाए ब्रह्मदत्त आव्याना समाचार सांभळी पोताना सैन्य तथा वाहनो सहित सामा आवी कुमारने हाथी उपर बेसाडी नगर प्रवेश कराव्यो पोताना महेलमां लइ जइ कुमारने माटे स्नान भोजनादि तैयारी करावी अत्यंत सत्कार कर्यो, अने पोतानी पुत्री कनकवती, अनेक हाथी घोडा रथ तथा द्रव्यभंडार सहित कुमारने आपी महोटी धामधूमथी विवाह कर्यो,

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अहीं आ राजकुमारी साथे वैभव सुख माणतां आनंदमां केटलोक काळ वीत्यो. त्यार पछी दूतो मोकली पुष्पचूळ राजा, धनुमंत्री, कणेरदत्त तथा भवदत्त वगेरेने तेमना सैन्य तथा वाहन सहित बोलाव्या तेथी अनेक राजमंत्रीओ आव्या ते सर्वेए मळी कुमारने राज्याभिषेक कर्यो अने वरधनु सेनापति थया.

ब्रह्मदत्तः सर्वसैन्यसहितो दीर्घनृपोपरि चलितः, अविच्छिन्नप्रयाणैश्च कांपिल्यपुरे प्राप्तः. दीर्घनृपेणापि कटकादीनां दूतः प्रेषितः, परं तैस्तु निर्भर्त्सितः स दूतः स्वस्वामिसमीपे गतः; ब्रह्मदत्तसैन्येन कांपिल्यपुरं समंताद्वेष्टितं ततो दीर्घनृपेणैवं चिंतितं. कियत्कालमस्माभिर्बिलप्रविष्टैरिव स्थेयं? साहसमवलंब्य नगरात्स्वसैन्यपरिवृतो दीर्घनृपो निर्गत्य सन्मुखमायातः. ब्रह्मदत्तदीर्घनृपसैन्ययोर्घोरः संग्रामः प्रवृत्तः. क्रमाद् ब्रह्मदत्तसैन्येन दीर्घनृपसैन्यं भग्नं. अथ दीर्घनृपः स्वयमुत्थितः, ब्रह्मदत्तोऽपि तमायातं वीक्ष्य प्रदीप्तकोपानलस्तदभिमुखं चलितः, तयोर्द्वयोर्युद्धं लग्नं. अनेकैरायुधैर्निक्षिप्तैर्न तयोः संग्रामरसः संपूर्णो बभूव. ब्रह्मदत्तेन ततश्चक्रं मुक्तं. चक्रेण दीर्घनृपमस्तकं छिन्नं. ततो जयत्येष चक्रवर्तीत्युच्छलितः कलकलः, सिद्धगंधर्वदेवैर्मुक्ता पुष्पवृष्टिः, उक्तं च उत्पन्नोऽयं द्वादशश्चक्री.

तदनंतर सर्व सैन्य सहित ब्रह्मदत्त दीर्घराजा उपर चडाइ करी, सतत प्रयाण करता कांपिल्यपुर पहोंच्या. दीर्घनृपे पण कटक राजा वगेरेने दूत मोकली केण कहेवराव्युं पण तेओए दूतने तरछोडी काढ्यो ते पाछो पोताना स्वामी पांसे गयो. ब्रह्मदत्तना सैन्ये कांपिल्यपुरने फरतो घेरो घाल्यो त्यारे दीर्घनृपे विचार्युं के–आपणे आम दरमां भराइ रह्या जेवा क्यां सुधी रहेवाशे? माटे हवे तो बहार पडवुं; आम निश्चय करी साहस स्वीकारी पोताना तमाम सैन्य साथे लइ नगरमांथी नीकळी दीर्घनृप संमुख आव्यो अने

For Private and Personal Use Only

साम सामा बेय सैन्यनो घोर संग्राम चाल्यो, आ मामलामां ब्रह्मदत्तना योद्धाओए दीर्घराजाना सैन्यने नष्ट कर्युं त्यारे दीर्घनृप पोते उठ्यो; ब्रह्मदत्ते जेवो तेने सामो आवतो जोयो के तेनो कोपाग्नि प्रज्वलित थयो तेथी ते कुमार तेनी सामे धस्या, आ बेयनुं युद्ध मंडाणुं. घणां आयुधोनो उपयोग थतां पण संग्रामरस पूरो न थयो त्यारे ब्रह्मदत्ते चक्र मूकी ते चक्रवर्ती दीर्घराजानुं मस्तक छेदी नाख्युं, तेज क्षणे सैन्यमां 'चक्रवर्त्ती जीत्या' एवो कोलाहल थयो. सिद्धदेव गंधर्व आदिके आकाशमांथी 'बारमो चक्रवर्त्ती उत्पन्न थयो' आम बोली पुष्पनी वृष्टि करी,

ततो जनपदलोकैः स्तूयमानो नारीवृंदकृतमंगलः कुमारः स्वमंदिरे प्रविष्टः, कृतश्च सकलसामंतैर्ब्रह्मदत्तस्य चक्रवर्त्यभिषेकः. चक्रवर्तित्वं पालयन् ब्रह्मदत्तः सुखेन कालं निर्गमयति. अन्यदा चक्रवर्तिनः पुरो नटेन नाट्यं कर्तुमारब्धं, स्वदास्या अपूर्वं कुसुमदामगंडं हस्ते ढौकितं. तच्च प्रेक्षतो गीतविनोदं श्रृण्वतश्चक्रवर्तिन एवं विमर्शो जातः. एवंविधो नाट्यविधिर्मया क्वचिद् दृष्टः, क्वचिच्चैतादृशं पुष्पदामगंडमपि घ्रातं. एवं चिंतयतस्तस्य जातिस्मरणमुत्पन्नं. दृष्टाः पूर्वभवाः, तत्र सौधर्मे पद्मगुल्मविमानेऽनुभूतं नाट्यदर्शनदिव्यपुष्पाघ्राणादिकं तस्य स्मृतिपथमाययौ. देवसुखस्मरणेन मूर्छां गतः पतितो भूमौ चक्री, पार्श्ववर्तिभिर्वातोत्क्षेपादिना स्वस्थीकृतः. यतश्चक्रवर्तिना पूर्वभवभ्रातृशुध्ध्यर्थं श्लोकार्धमिदं रचितं, यथा—

ते पछी नगरना लोकोए स्तुति करी तथा नारीओनां टोळां मळीने मंगळ गीत गातां ब्रह्मदत्तकुमारे पोताना महेलमां प्रवेश कर्यो. सकल सामंतोए भेळा थइ ब्रह्मदत्तने चक्रवर्त्ती तरीके अभिषेक कर्यो; आम चक्रवर्त्ती तरीके राज्यपालन करतां ब्रह्मदत्तने

घणोक काळ वीत्यो, एक समये चक्रवर्त्ती आगळ नटोए नाट्य प्रयोगनो आरंभ कर्यो, तेटलामां तेमनी दासीए एक अपूर्व पुष्पनो गुच्छो लावीने चक्रवर्त्तीना हाथमां आप्यो, आ पुष्पगुच्छ सुंघता तथा नाट्यमांना गीतविनोद सांभळतां राजाना मनमां एवो विचार आव्यो के-'में आवाज प्रकारनो नाट्यप्रयोग क्यांक जोयेलो छे अने ते साथे आवाज पुष्पोनो गुच्छ पण क्यांक सूंघेलो छे.' आम विचार करतां राजाने जातिस्मरण थइ आव्युं तेथी पूर्वभवोनुं स्मरण थयुं, सौधर्म पद्मगुल्म विमानमां पूर्वे अनुभवेलुं नाट्य दर्शन तथा दिव्य पुष्प सूंघेलां ते बधुं याद आव्युं; देव सुखना स्मरणथी क्षणवार मूर्छा आवी, तेथी चक्री भूमि पर पडी गया; पांसे बेठेला परिजने पवन नाखवा वगेरे उपचारथी स्वस्थ थया, त्यारे चक्रवर्त्तिए पूर्वभवना भाइनी शुद्धि अर्थे—

आस्व दासा मृगा हंसौ । मातंगावमरौ तथा ॥ इदं श्लोकार्धं कृत्वा चक्रिणा वरधनुसेनापतेरुक्तं, इदं श्लोकार्धं सर्वत्र निर्घोषय? एतत्पश्चिमार्धं यः पूरयति तस्य राजा राज्यार्धं ददाति. इदं श्लोकार्धं सर्वलोकैः शिक्षितं, ते यत्र तत्र निर्घोषयंति. अत्रावसरे स पूर्वभवसंबंधी भ्राता चित्रजीवः पुरिमतालनगरे इभ्यपुत्रो भूत्वा संजातजातिस्मरणो गृहीतव्रतस्तत्र नगरे मनोरमाभिधाने आरामे समवसृतः. तत्र प्रासुके भूभागे पात्रोपकरणानि निक्षिप्य धर्मध्यानोपगतः कायोत्सर्गेण स्थितः. अत्रांतरे आरघट्टिकेन पठ्यमानं तत् श्लोकार्धं मुनिना श्रुतं. ज्ञानोपयोगेन स्वभ्रातृस्वरूपं सर्वमवगम्य मुनिनोत्तरचरणद्वयं पूरितं-एषा नौ षष्टिका जाति-रन्योन्याभ्यां वियुक्तयोः ॥ १ ॥ ततोऽसावारघट्टिकस्तत् श्लोकार्धं लिखित्वा प्रफुल्लास्यपंकजो गतो राजकुलं, पठितश्चक्रिणः पुरः संपूर्णः श्लोकः.

'आपणे दास, मृग, हंस, मातंग तथा अमर=देव पण थया.'=आ अर्धो श्लोक रचीने वरधनु सेनापतिने कह्युं के—आ अर्धो

श्लोकने उत्तरार्ध बनावी पूरो करे तेने राजा पोतानुं अर्धु राज्य आपशे' आवी सर्वत्र घोषणा करावी. जाहेर पडो वाजतां ए अर्ध श्लोक तो सर्व लोक शीखी गया अने तेओए ज्यां त्यां एनी प्रसिद्धि करवा मांडी. आ अवसरे ते पूर्वभव संबंधी भाइ चित्रनो जीव, पुरिमताल नगरमां कोइ एक धनाढ्य शेठना पुत्र अवतरी जातिस्मरण थवाथी व्रत ग्रहण करीने एज नगरमां मनोरम नामना बगीचामां समवसृत=संनिविष्ट थया हता, त्यांकणे प्रासुक भूमिप्रदेशमां पात्र उपकरणादि राखीने धर्मध्यानमां प्रवण थइ कायोत्सर्गथी स्थित हता. एटलामां कुवामांथी घटमाळ काढनारा एक पुरुषना मुखथी ते अर्ध श्लोक मुनिए सांभळ्यो. ज्ञानना उपयोगवडे पोताना भाइनुं स्वरूप बधुं जाणीने मुनिए पाछळनां बे चरणो पूरां करवा कह्युं के–'एक बीजाथी विखूटा पड्या ने आपणो आ छठ्ठो भव छे' आ सांभळी पेला घटमाळ खेंचनाराए अर्धो श्लोक गोखी लखी लीधो अने प्रसन्न थतो हसते मुखे राजकुळमां जइ चक्रवर्त्ती आगळ आखो श्लोक बोल्यो;

ततः पूर्वभवभ्रातृस्नेहातिरेकेण चक्री मूर्छां गतः, क्षुभिता सभा, रोषवशंगतेन सेवकवर्गेण आरघट्टिकश्चपेटाभिर्हंतुमारब्धः, हन्यमानेन तेनोक्तं, इदं पदद्वयं मया न पूरितं किंतु वनस्थितेन मुनिनेति विलपन्नसौ मोचितः. गतमूर्छेन चक्रिणा पूर्वभवभ्रातृमुनिं समागतं श्रुत्वा तद्भक्तिस्नेहाकृष्टचित्तो ब्रह्मदत्तचक्री सपरिकरो निर्ययौ. उद्याने तं मुनिं ददर्श, वंदित्वा चाग्रे उपविष्टः, मुनिना प्रारब्धा धर्मदेशना, दर्शिता भवनिर्गुणता, वर्णिताः कर्मबंधहेतवः, श्लाघितो मोक्षमार्गः, ख्यापितः शिवसौख्यातिशयः, इमां देशनां श्रुत्वा पर्षत्संविग्ना जाता.

ते सांभळी पूर्वभवना भाइनो अति स्नेह स्मरण थतां राजा मूर्छा पाम्या सभा बधी क्षोभ पामी गइ, सेवको बधा गुस्से थइ ते

